GOVERNMENT OF TAMILNADU

# संस्कृतरञ्जनी

# SANSKRIT READER
## VII STD

" सह नाववतु सह नौ भुनक्तु
सह वीर्यं करवावहै "

Department of School Education

**Untouchability is Inhuman and a Crime**

VII Perface.indd 1 22-03-2019 15:13:34

**Government of Tamil Nadu**

First Edition - 2019
Reprint - 2020, 2021, 2022, 2023, 2024
Published under New Syllabus

**Content Creation**

State Council of Educational Research and Training

© SCERT 2019

**Printing & Publishing**

Tamil NaduTextbook and Educational Services Corporation

www.textbooksonline.tn.nic.in



VII Perface.indd 2 22-03-2019 15:13:34

# आमुखम् - Preface

"विद्याधनं सर्वधनप्रधानम्" इत्युक्तिः। अत एव मनुष्याः तद्धनमार्जयितुं यतन्ते। तत्रापि बालकाः विद्यालयेषु छात्रान् भूत्वा तदार्जयन्ति। यतो हि, विद्यया विना कस्यापि गौरवं न आगच्छति। विद्या गुरूणां गुरुः भवति।

अद्यत्वे केवलं पुस्तकस्था विद्या छात्राणां सुखकरी न भवति। सैव विद्या भवति या भविष्यत्काले स्वस्वप्नं वास्तविकं कर्तुम् उपयुक्ता भवेत्। अतः अद्यत्वे पुस्तकीयज्ञानेन सह प्रायोगिकज्ञानसंपादनाय अवसरः प्रकल्पितः विद्यते।

परं भारतीयाः महर्षयः शिष्येभ्यः तादृशीमेव ज्ञानकरीं विद्याम् अबोधयन् इत्ययं विषयः संस्कृतग्रन्थैः ज्ञायते। अतः छात्राणां कृते संस्कृताध्ययनं महदुपकारं कल्पयति। तत्र विद्यामानाः वेदस्मृत्यादयः ग्रन्थाः छात्राणां कृते भारतीयसंस्कृतिं संबोध्य, सन्मार्गप्रवर्तने धर्मेण वर्तितुं च उत्साहं जनयति।

प्रस्तुतं सप्तमकक्ष्यायाः कृते निर्मितमिदं संस्कृतपाठ्यपुस्तकं तावत् अस्माकं संस्कृतिं, देशस्य औन्नत्यं, सनातनधर्मस्य च महत्वं कथयति। इदं यथा छात्राणां श्रवण-भाषण-पठन-लेखनमिति चत्वारि कौशलानि विकसितानि भवेयुः, छात्राः अत्रोक्तैः नीतिविषयैः अस्माकं संस्कृतिं ज्ञात्वा, पूर्वजानां आचारमवगत्य च सदा सन्मार्गप्रवर्तने यतेयुः, मिथ्याज्ञानमपाकृत्य वास्तविकं ज्ञानं प्राप्नुयुः, केवलं मौखिकपठनम् अपाकृत्य सचिन्तनं व्यवहर्तुं प्रयत्नं कुर्युः, एवं च पारम्परिकभाषात्वेन विद्यमानया तमिल्भाषया सह तुलनां कृत्वा उभयोः तमिल्संस्कृतयोः महत्वं जानीयुः, तथा निर्मितं पाठ्यपुस्तकं छात्राणां सर्वाङ्गीनविकासाय स्वलक्ष्यप्राप्तये च शिक्षकसमित्या परिकल्पितं विद्यते।

अस्मिन् पाठ्यपुस्तके प्रधानतया गद्यं, पद्यं, व्याकरणमिति भागत्रयं वर्तते। एकैकस्मिन् विभागे शब्दकोशः, अर्थकोशः, अर्थज्ञानकौशलाभ्यासाः, भाषाज्ञानकौशलाभ्यासाः, कौशलवर्धनावृत्यभ्यासाः इति लक्ष्येषु विषयाः संकलिताः सन्ति।

अर्थज्ञानकौशलाभ्यासे प्रश्नाः पृष्टाः सन्ति। एते प्रश्नाः पाठविषयमभिप्रेत्य पृष्टाः। ततः परं भाषाज्ञानकौशलवर्धकाः प्रश्नाः सन्ति।

गद्यभागे स्थितानां पाठानां पदशब्दप्रयोगमधिकृत्य विषयाः स्थापिताः सन्ति । व्याकरणं च पाठाननुसृत्य अध्यापनीयमिति मत्वा तथा व्याकरणविषयाः निबद्धाः सन्ति यथा छात्राः सुलभेन पाठान् अवगच्छेयुः ।



VII Perface.indd 3 22-03-2019 15:13:34

# देशीयगीतम्

जन गण मन अधिनायक जय हे
भारत भाग्य विधाता
पञ्जाब सिन्धु गुजरात मराठा
द्राविड उत्कल बङ्गा
विन्ध्य हिमाचल यमुना गङ्गा
उच्छल जलधि तरङ्गा
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा
जन गण मङ्गल दायक जय हे
भारत भाग्य विधाता
जय हे जय हे जय हे
जय जय जय जय हे !

महाकवि रवीन्द्रनाथ ठाकुरः

अस्पृश्यत्वम् अपचारः
अस्पृश्यत्वम् अपराधः
अस्पृश्यत्वम् अमानवधर्मः



VII Perface.indd 4 22-03-2019 15:13:34

# राष्ट्रिय प्रतिज्ञा

सर्वे वयं भारतदेशबालाः
स्वातन्त्र्यपीयूषसरोमरालाः ।
नीचोच्चजात्यादिविभेदशून्याः
सर्वे समानाश्च सहोदराश्च ॥ ॥1॥

एको भावः सर्वसंक्षेपरूपः
एका भाषा भूतकारुण्यरूपा ।
एकं लक्ष्यं सामरस्यं समेषां
एकं तत्वं चित्तमानन्दपूर्णम् ॥ ॥2॥



VII Perface.indd 5 22-03-2019 15:13:34

## SANSKRIT AND CULTURE GO TOGETHER

- Swami Vivekananda

## OBJECTIVES:-

- To create interest in Sanskrit learning.
- To make the school going children to understand the precepts and practice of Indian culture and to inherit the leadership qualities.
- To enjoy the ancient classic with aesthetic experience.
- To prepare the students to speak, quote and compare Sanskrit with other languages.
- To morally and ethically enrich the attitude of students in order to make them as noble citizens of India.

Tamil and Sanskrit are friendly Classical languages of our motherland for so many centuries.

Both the languages have mutual affinity to each other. Hence the learning of Sanskrit language in Tamil Nadu would help the comparative studies in future.

Of course, Sanskrit learning along with Tamil (उभयप्रधान) mutually giving importance to each other was in vogue for many decades.

However, an attempt through this preparation of Textbooks has been made to enthuse the students not only to read Sanskrit in its original tongue but also to understand the merits of both the classical languages.

The listening and understanding the meaning of the word and sentences deeply reflecting the values and contents would be highly useful for the students of today.

The present preparation of the Sanskrit Textbooks for the Class 7 adopt the modern methodology by way of framing typical questions that would enhance the memory as well as the language speaking skills of the students.

Meticulous care has been taken to select portions suitable to the respective standards after comparing the contents of Sanskrit books prescribed in various standards in various states.

Apart from the course book and the workbook, study materials are given for additional reading to enrich the knowledge of the students.

The assessment and the examination pattern are in par with other languages taught in unified syllabus of Tamil Nadu.

**-Text Book Committee**



VII Perface.indd 6 22-03-2019 15:13:34

# विषयसूची – (INDEX)


| पाठः (Lesson) | विषयः (Topic) | पृष्ठसंख्या (Page No.) |
|---|---|---|
| भाषापरिचयः | अक्षरावृत्तिः | |
| 1. प्रथमः पाठः | आत्तिचूडि | 1 |
| 2. द्वितीयः पाठः | महाकविः भारतीयार् | 6 |
| व्याकरण-अभ्यासः - 1 | इकारान्ताः अजन्तपुंलिङ्गशब्दाः | |
| 3. तृतीयः पाठः | संस्कृतगीतम् | 13 |
| 4. चतुर्थः पाठः | उत्तमकवयः | 19 |
| व्याकरण-अभ्यासः - 2 | धातुः - परस्मैपदी - लङ् लकारः | |
| 5. पञ्चमः पाठः | सुभाषितानि | 26 |
| 6. षष्ठः पाठः | प्रत्यक्षदेवताः | 34 |
| व्याकरण-अभ्यासः - 3 | इकार-ईकारान्ताः अजन्तस्त्रीलिङ्गशब्दाः | |
| 7. सप्तमः पाठः | दिक्-परिचयः | 40 |
| 8. अष्टमः पाठः | अस्माकं मातृभूमिः | 45 |
| व्याकरण-अभ्यासः - 4 | धातुः - परस्मैपदी - लङ् लकारः | |
| 9. नवमः पाठः | दिलीपवर्णनम् | 50 |
| 10. दशमः पाठः | सत्यमेव जयते | 57 |
| व्याकरण-अभ्यासः - 5 | इकारान्ताः अजन्तनपुंसकलिङ्गशब्दाः | |
| 11. एकादशः पाठः | पर्णविज्ञानम् | 64 |
| 12. द्वादशः पाठः | गुरुभक्तिः | 72 |
| व्याकरण-अभ्यासः - 6 | धातुः - परस्मैपदी - लङ् लकारः | |




Introduction Pages.indd 7 22-03-2019 15:25:09

# मङ्गलाचरणम्

## ऐक्यमन्त्रः

यं वैदिका मन्त्रदृशः पुराणाः

इन्द्रं यमं मातरिश्वानमाहुः ।

वेदान्तिनोऽनिर्वचनीयमेकं

यं ब्रह्मशब्देन विनिर्दिशन्ति ।। ।।1।।

शैवा यमीशं शिव इत्यवोचन्

यं वैष्णवा विष्णुरिति स्तुवन्ति ।

बुद्धस्तथार्हन्निति बौद्धजैनाः

सच्छ्री अकालेति च सिक्खसन्तः।। ।।2।।

शास्तेति केचित् कतिचित् कुमारः

स्वामीति मातेति पितेति भक्त्या

यं प्रार्थयन्ते जगदीशितारं

स एक एव प्रभुरद्वितीयः ।। ।।3।।



VII Perface.indd 8 22-03-2019 15:13:34

“Sanskrit is like the river Ganga for our languages, If it were to dry up, the regional languages also would lose their vitaliry and power.”

**– Mahatma Gandhiji**

“The past has gone and the present is with us and we work for thefuture, But I have no doubt that whatever shape that future may take, one of the biggest, the strongest and the most powerful and the most valued, of our legacies will be the Sanskrit language.”

**– Pandit Jawaharlal Nehru**

“Sanskrit is the most suitable language that could be made the official language.”

**– Dr. Ambedkar**

“I often wonder which is the most important of the many things that have distinguished India in the past, in its history of years. I have no doubt at all in my mind that it is the Sanskrit language. It is that which has embodied the genius and wisdom of our race. Almost everything that has come out in later years can somehow be found to have sprung from this ancient language only.”

**- Dr. S. Radhakrishnan**



VII Perface.indd 9 22-03-2019 15:13:34

# भाषापरिचयः



VII Perface.indd 10 22-03-2019 15:13:34

## अक्षरावृत्तिः

वर्णाः (Letters)
எழுத்துக்கள்

स्वराः (अचः)
Vowels
உயிரெழுத்துக்கள்

व्यञ्जनानि (हलः)
Consonants
மெய்யெழுத்துக்கள்

## (i) स्वराः (Vowels)

स्वराः - यस्य वर्णस्य उच्चारणे अपरस्य वर्णस्य सहायता नापेक्षिता, तस्य स्वरः इति नाम। यथा -

अ आ इ ई उ ऊ ऋ ॠ

ऌ ए ऐ ओ औ अं अः

स्वराः

ह्रस्वः (Short)
குறில்

दीर्घः (Long)
நெடில்

### ह्रस्वस्वराः (Short Vowels)

अ इ उ ऋ ऌ

### दीर्घस्वराः (Long Vowels)

आ ई ऊ ॠ ए ऐ ओ औ

## (ii) हलः (व्यञ्जनानि) Consonants

व्यञ्जनानि – यस्य वर्णस्य उच्चारणे स्वरवर्णस्य सहायता अपेक्षिता तस्य हलः इति नाम।

कवर्गः - क ख ग घ ङ



VII Perface.indd 11 22-03-2019 15:13:34

| | | | | | | |
|---|---|---|---|---|---|---|
| चवर्गः | - | च | छ | ज | झ | ञ |
| टवर्गः | - | ट | ठ | ड | ढ | ण |
| तवर्गः | - | त | थ | द | ध | न |
| पवर्गः | - | प | फ | ब | भ | म |
| अन्तस्थाः | - | य | र | ल | व | |
| ऊष्माणः | - | श | ष | स | ह | |

### (iii) स्वरयुक्तव्यञ्जनाक्षराणि (Compound letters)

| | | | | |
|---|---|---|---|---|
| क् + अ = क | ख्+ अ = ख | ग्+ अ = ग | घ्+ अ = घ | ङ्+ अ = ङ |
| च्+ अ = च | छ्+ अ = छ | ज्+ अ = ज | झ्+ अ = झ | ञ्+ अ =ञ |
| ट्+ अ = ट | ठ्+ अ = ठ | ड्+ अ = ड | ढ्+ अ = ढ | ण्+ अ =ण |
| त्+ अ = त | थ्+ अ = थ | द्+ अ = द | ध्+ अ = ध | न्+ अ =न |
| प्+ अ = प | फ्+ अ = फ | ब्+ अ = ब | भ्+ अ = भ | म्+ अ =म |
| य् + अ = य | र्+ अ = र | ल्+ अ = ल | व्+ अ = व | श्+ अ =श |
| ष्+ अ = ष | स्+ अ = स | ह्+ अ = ह | | |

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| क | का | कि | की | कु | कू | कृ | कॄ | कॢ | के | कै | को | कौ | कं | कः |
| ख | खा | खि | खी | खु | कू | कृ | खॄ | खॢ | खे | खै | खो | खौ | खं | खः |
| ग | गा | गि | गी | गु | गू | गृ | गॄ | गॢ | गे | गै | गो | गौ | गं | गः |
| घ | घा | घि | घी | घु | घू | घृ | घॄ | घॢ | घे | घै | घो | घौ | घं | घः |
| ङ | ङा | ङि | ङी | ङु | ङू | ङृ | ङॄ | ङॢ | ङे | ङै | ङो | ङौ | ङं | ङः |
| च | चा | चि | ची | चु | चू | चृ | चॄ | चॢ | चे | चै | चो | चौ | चं | चः |
| छ | छा | छि | छी | छु | छू | छृ | छॄ | छॢ | छे | छै | छो | छौ | छं | छः |



VII Perface.indd 12 22-03-2019 15:13:34

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ज | जा | जि | जी | जु | जू | जृ | जॄ | जॢ | जे | जै | जो | जौ | जं | जः |
| झ | झा | झि | झी | झु | झू | झृ | झॄ | झॢ | झे | झै | झो | झौ | झं | झः |
| ञ | ञा | ञि | ञी | ञु | ञू | ञृ | ञॄ | ञॢ | ञे | ञै | ञो | ञौ | ञं | ञः |
| ट | टा | टि | टी | टु | टू | टृ | टॄ | टॢ | टे | टै | टो | टौ | टं | टः |
| ठ | ठा | ठि | ठी | ठु | ठू | ठृ | ठॄ | ठॢ | ठे | ठै | ठो | ठौ | ठं | ठः |
| ड | डा | डि | डी | डु | डे | डृ | डॄ | डॢ | डे | डै | डो | डौ | डं | डः |
| ढ | ढा | ढि | ढी | ढु | ढे | ढृ | ढॄ | ढॢ | ढे | ढै | ढो | ढौ | ढं | ढः |
| ण | णा | णि | णी | णु | णू | णृ | णॄ | णॢ | णे | णै | णो | णौ | णं | णः |
| त | ता | ति | ती | तु | तू | तृ | तॄ | तॢ | ते | तै | तो | तौ | तं | तः |
| थ | था | थि | थी | थु | थु | थृ | थॄ | थॢ | थे | थै | थो | थौ | थं | थः |
| द | दा | दि | दी | दु | दू | दृ | दॄ | दॢ | दे | दै | दो | दौ | दं | दः |
| ध | धा | धि | धी | धु | धू | धृ | धॄ | धॢ | धे | धै | धो | धौ | धं | धः |
| न | ना | नि | नी | नु | नू | नृ | नॄ | नॢ | ने | नै | नो | नौ | नं | नः |
| प | पा | पि | पी | पु | पू | पृ | पॄ | पॢ | पे | पै | पो | पौ | पं | पः |
| फ | फा | फि | फी | फु | फू | फृ | फॄ | फॢ | फे | फै | फो | फौ | फं | फः |
| ब | बा | बि | बी | बु | बू | बृ | बॄ | बॢ | बे | बै | बो | बो | बं | बः |
| भ | भा | भि | भी | भु | भू | भृ | भॄ | भॢ | भे | भै | भो | भौ | भं | भः |
| म | मा | मि | मी | मु | मू | मृ | मॄ | मॢ | मे | मै | मो | मौ | मं | मः |
| य | या | यि | यी | यु | यू | यृ | - | - | ये | यै | यो | यौ | यं | यः |
| र | रा | रि | री | रु | रू | - | - | - | रे | रै | रो | रौ | रं | रः |
| ल | ला | लि | ली | लु | लू | लृ | - | - | ले | लै | लो | लौ | लं | लः |
| व | वा | वि | वी | वु | वू | वृ | वॄ | वॢ | वे | वै | वो | वौ | वं | वः |
| श | शा | शि | शी | शु | शू | शृ | शॄ | शॢ | शे | शै | शो | शौ | शं | शः |
| ष | षा | षि | षी | षु | षू | षृ | षॄ | षॢ | षे | षै | षो | षौ | षं | षः |
| स | सा | सि | सी | सु | सू | सृ | सॄ | सॢ | से | सै | सो | सौ | सं | सः |
| ह | हा | हि | ही | हु | हू | हृ | हॄ | हॢ | हे | है | हो | हौ | हं | हः |



VII Perface.indd 13 22-03-2019 15:13:35

## (iv) संयुक्ताक्षराणि
## Conjunct Consonants

क्
क् + क= क्क
क् + त= क्त
क् + य= क्य
क् + र= क्र
क् + ष= क्ष
क् + व= क्व
ख्
ख्+ य= ख्य
ग्
ग्+ म= ग्म
ग्+ न= ग्न
ग्+ र = ग्र
घ्
घ्+ म= घ्म
घ्+ न= घ्न
घ् + य= घ्य
घ् + र= घ्र
च्
च्+ च= च्च

च्+ छ= च्छ
च्+ न= च्न
च्+ म= च्म
च्+ र= च्र
ज्
ज्+ ज= ज्ज
ज्+ न= ज्न
ज्+ म= ज्म
ज्+ य = ज्य
ज्+ र = ज्र
ज् + ञ= ज्ञ
ट्
ट्+ ट= ट्ट
ट्+ य = ट्य
ट्+ र= ट्र
ठ्
ठ्+ य = ठ्य
ड्
ड्+ ड= ड्ड
ड्+ य = ड्य

ड्+ र= ड्र
ण्
ण्+ क= ण्क
ण्+ ड= ण्ड
ण्+ ण= ण्ण
त्
त्+ क= त्क
त्+ त= त्त
त्+ म= त्म
त्+ न= त्न
त्+ र= त्र
त्+ य = त्य
त्+ व= त्व
थ्
थ्+ य = थ्य
थ्+ व= थ्व
थ्+ र= थ्र
द्
द्+ ग= द्ग
द्+ द= द्द

द्+ व= द्व
द् + ध= द्ध
द्+ र= द्र
द् + म= द्म
द्+ य= द्य
ध्
ध्+ न= ध्न
ध्+ म= ध्म
ध्+ य= ध्य
ध्+ र= ध्र
ध्+ व= ध्व
न्
न्+ क= न्क
न्+ त= न्त
न्+ द= न्द
न्+ न= न्न
न्+ म= न्म
न्+ व= न्व
प्
प्+ त= प्त



VII Perface.indd 14 22-03-2019 15:13:35

प्+ न= प्न

प्+ म= प्म

प्+ य= प्य

प्+ र= प्र

फ्

फ् + ल= फ्ल

ब्

ब्+ ज= ब्ज

ब्+ द= ब्द

ब्+ ध= ब्ध

ब्+ व= ब्व

ब्+ र= ब्र

भ्

भ्+ न= भ्न

भ्+ य= भ्य

भ्+ व= भ्व

भ्+ र= भ्र

म्

म्+ न= म्न

म्+ म= म्म

म्+ य= म्य

म्+ ल= म्ल

म्+ र= म्र

य्

य्+ य= य्य

य्+ व= य्व

र्

र्+ क= र्क

र्+ त= र्त

र्+ न= र्न

र्+ म= र्म

र्+ य= र्य

ल्

ल्+ क= ल्क

ल्+ त= ल्त

ल्+ न= ल्न

ल्+ प= ल्प

ल्+ ल= ल्ल

व्

व्+ न= व्न

व्+ य= व्य

व्+ र= व्र

श्

श्+ च= श्च

श्+ छ= श्छ

श्+ न= श्न

श्+ व= श्व

श्+ र= श्र

ष्

ष्+ क= ष्क

ष्+ ट= ष्ट

ष्+ ण= ष्ण

ष्+ म= ष्म

ष्+ र= ष्र

स्

स्+ क= स्क

स् + त= स्त

स्+ थ = स्थ

स् + म= स्म

स्+ र= स्र

ह्

ह्+ व= ह्व

ह् + ण= ह्ण

ह्+ न = ह्न

ह् + म= ह्म

ह् + य = ह्य

ह् + र= ह्र



VII Perface.indd 15 22-03-2019 15:13:35

## लिङ्गज्ञानम्

### (i) पुल्लिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. बालकः | 2. अजः | 3. गजः | 4. अश्वः | 5. रथः |
| 6. हस्तः | 7. नरः | 8. वानरः | 9. छात्रः | 10. अध्यापकः |
| 11.वृक्षः | 12. बकः | 13. कन्दुकः | 14. सूर्यः | 15. मकरः |
| 16. शशकः | 17. हंसः | 18. काकः | 19. मेघः | 20.मीनः |
| 21. मयूरः | 22. मृगः | 23. सिंहः | 24.पर्वतः | 25. चन्द्रः |
| 26. कृषकः | 27. पिकः | 28. सर्पः | 29. शुकः | 30. गर्दभः |

### (ii) स्त्रीलिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. बालिका | 2. लता | 3. पेटिका | 4. शिबिका | 5. माला |
| 6. छात्रा | 7. अध्यापिका | 8. सेविका | 9. महिला | 10. मक्षिका |
| 11. कलिका | 12. वाटिका | 13. शाखा | 14. घटिका | 15. नौका |
| 16. वर्तिका | 17. पताका | 18. चटका | 19. शाटिका | 20. सरिता |
| 21. पाठशाला | 22. पत्रिका | 23. वेला | 24. वेदिका | 25. कन्या |
| 26. प्रतिमा | 27. कुल्या | 28. मासिका | 29. जिह्वा | 30. पादुका |

### (iii) नपुंसकलिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. फलम् | 2. पत्रम् | 3. गृहम् | 4. पुष्पम् | 5. कमलम् |
| 6. शाकम् | 7. नेत्रम् | 8. मुखम् | 9. धनम् | 10. जलम् |
| 11. चित्रम् | 12. वनम् | 13. विमानम् | 14. दुग्धम् | 15. भवनम् |
| 16. उद्यानम् | 17. नक्षत्रम् | 18. नगरम् | 19. पुस्तकम् | 20. छत्रम् |
| 21. बीजम् | 22. यन्त्रम् | 23. ओदनम् | 24. वस्त्रम् | 25. मोदकम् |
| 26. सोपानम् | 27. पात्रम् | 28. ज्ञानम् | 29. शरीरम् | 30. उपनेत्रम् |



VII Perface.indd 16 22-03-2019 15:13:35

## वचनविभागः

### (i) पुल्लिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | बालकः | बालकौ | बालकाः |
| 2. | अजः | अजौ | अजाः |
| 3. | गजः | गजौ | गजाः |
| 4. | रथः | रथौ | रथाः |
| 5. | वृक्षः | वृक्षौ | वृक्षाः |
| 6. | वानरः | वानरौ | वानराः |
| 7. | अश्वः | अश्वौ | अश्वाः |
| 8. | मयूरः | मयूरौ | मयूराः |
| 9. | शुकः | शुकौ | शुकाः |
| 10. | सिंहः | सिंहौ | सिंहाः |

### (ii) स्त्रीलिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | बालिका | बालिके | बालिकाः |
| 2. | लता | लते | लताः |
| 3. | माला | माले | मालाः |
| 4. | पेटिका | पेटिके | पेटिकाः |
| 5. | महिला | महिले | महिलाः |
| 6. | पताका | पताके | पताकाः |
| 7. | शाखा | शाखे | शाखाः |
| 8. | पाठशाला | पाठशाले | पाठशालाः |



VII Perface.indd 17 22-03-2019 15:13:35

| | | | |
|---|---|---|---|
| 9. | नौका | नौके | नौकाः |
| 10. | मक्षिका | मक्षिके | मक्षिकाः |

### (iii) नपुंसकलिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | फलम् | फले | फलानि |
| 2. | पत्रम् | पत्रे | पत्राणि |
| 3. | कमलम् | कमले | कमलानि |
| 4. | नेत्रम् | नेत्रे | नेत्राणि |
| 5. | धनम् | धने | धनानि |
| 6. | वनम् | वने | वनानि |
| 7. | विमानम् | विमाने | विमानानि |
| 8. | गृहम् | गृहे | गृहाणि |
| 9. | मोदकम् | मोदके | मोदकानि |
| 10. | पुस्तकम् | पुस्तके | पुस्तकानि |



VII Perface.indd 18 22-03-2019 15:13:35

Lesson 1

# प्रथमः पाठः

# आत्तिचूडि

अव्वैयार् नाम महिला पण्डितशिरोमणिः द्विसहस्रवर्षेभ्यः प्राक् जीविता। अस्याः स्थानं तमिल्भाषायां अतिमुख्यतमं विद्यते। अस्याः ग्रन्थाः - आत्तिचूडि, कौन्ड्रैवेन्दन्, नल्वलि, मूदुरै इत्यादयः। ततः अत्र आत्तिचूडितः केचन नीतयः पाठनाय प्रदत्ताः विद्यन्ते।।

1. यन्न दृष्टं न तद् ब्रूयात्
கண்டு ஒன்று சொல்லேல்

2. वक्तव्यं मधुरं वचः
ஞயம்பட உரை

3. पालयेत् पितरौ सदा।
தாய் தந்தை பேண்

4. स्मरेत् परकृतं साह्यम्।
நன்றி மறவேல்

5. न ब्रूयात् कपटं वचः।
வஞ்சகம் பேசேல்

6. न ब्रूयात् क्रोधवचनम्।
கடிவது மற



7. भव त्वं सद्गुणान्वितः।
குணமது கைவிடேல்

8. अपकारो नैव कर्तव्यः।
கெடுப்பது ஒழி



unit 1.indd 1 22-03-2019 14:59:12

9. कार्यं साधु विधीयताम् ।
செய்வன திருந்தச் செய்

10.आलस्यं त्यज्यतां कार्ये ।
சோம்பித் திரியேல்

11.पापकर्म न कुर्वीत ।
தீவினை அகற்று

12.सत्यकार्यं कुरु सर्वदा ।
நன்மை கடைப்பிடி

13.गम्यताम् ऋजुमार्गेण ।
நேர்பட ஒழுகு

14.खलं सर्पसमं त्यज ।
பாம்பொடு பழகேல்

15.शृणु वाक्यं महात्मनाम् ।
மேன்மக்கள் சொல் கேள்

## अभ्यासः

## I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. दृष्टम् - ____________________
2. मधुरम् - ____________________
3. पितरौ - ____________________
4. परः - ____________________
5. कपटम् - ____________________
6. क्रोधः - ____________________



unit 1.indd 2 22-03-2019 14:59:13

7. त्वम् - ____________________

8. अपकारः - ____________________

9. साधुः - ____________________

10. आलस्यम् - ____________________

11. पापम् - ____________________

12. सर्वदा - ____________________

13. मार्गः - ____________________

14. खलः - ____________________

15. महात्मा - ____________________

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. दृष्टम् × ____________________
2. मधुरम् × ____________________
3. साह्यम् × ____________________
4. गुणः × ____________________
5. उपकारः × ____________________
6. अकार्यम् × ____________________
7. साधु × ____________________
8. पुण्यम् × ____________________
9. सत्यम् × ____________________
10. स्मरेत् × ____________________

## III. पाठात् समुचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. ________ ________ न तद् ब्रूयात्।
2. पालयेत् ________ सदा।



unit 1.indd 3 22-03-2019 14:59:13

3. न ________ कपटं वचः ।

4. ________ ________ सद्गुणान्वितः।

5. कार्यं साधु ________ ।

6. पापकर्म ________ कुर्वीत ।

7. सत्यकार्यं कुरु ________ ।

8. ________ सर्पसमं ________

## IV. मातृभाषायाम् अनुवादं कुरुत–

1. वक्तव्यं मधुरं वचः ।

2. स्मरेत् परकृतं साह्यम् ।

3. न ब्रूयात् क्रोधवचनम् ।

4. अपकारो नैव कर्तव्यः ।

5. गम्यताम् ऋजुमार्गेण ।

## V. सविस्तरम् उत्तरं लिखत-

1. आत्तिचूडि इति पाठात् पञ्च वाक्यानि सानुवादं लिखत ।

*********************************

### पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

अथाक्षरावलिर्जयत्यकारपूर्विका यथा।
तथाखिलं चराचरं जगन्महेशपूर्वकम् ।। 1

अमर्षणं निस्पृहा प्रकोपनं च दुर्वचः ।
मनोमलं विनामुना कृतं तु धर्मतास्पदम् ।। 2

स्वदारराग‌धर्मवान्गृहाश्रमो भवेद्यदि ।
फले ग्रही भवेदयं महागुणः समेधते ।। 3

गृहाश्रमे महाधनं किमस्ति भार्यया विना ।
अलंकरोति चेदिमां पतिव्रतादृढव्रतम् ।। 4

सुदुर्लभाङ्गसङ्गमो दयाफलाय देहिनः ।
यदसङ्गमं विना न जीव आतनोति ताम् ।। 5



unit 1.indd 4 22-03-2019 14:59:13

## पाठ्यातिरिक्तः व्याकरणविषयः

## वर्णाः उच्चारणस्थानानि च

| वर्णानाम् उच्चारण स्थानानि | स्वरः | | वर्गीयव्यञ्जनानि / स्पर्शाः | | | | | अन्तःस्थाः | ऊष्माणः | वर्णानां जन्य स्थानानि |
|---|---|---|---|---|---|---|---|---|---|---|
| कण्ठः | अ | आ | क् | ख् | ग् | घ् | ङ् | - | ह् | कण्ठ्यम् |
| तालुः | इ | ई | च् | छ् | ज् | झ् | ञ् | य् | श् | तालव्यम् |
| मूर्धा | ऋ | ॠ | ट् | ठ् | ड् | ढ् | ण् | र् | ष् | मूर्धन्यम् |
| दन्तः | ऌ | - | त् | थ् | द् | ध् | न् | ल् | स् | दन्त्यम् |
| ओष्ठः | उ | ऊ | प् | फ् | ब् | भ् | म् | - | - | ओष्ठ्यम् |
| नासिका | - | - | ङ् | ञ् | ण् | न् | म् | - | - | नासिक्यम् |
| कण्ठतालु | ए | ऐ | - | - | - | - | - | - | - | कण्ठतालव्यम् |
| कण्ठोष्ठम् | ओ | औ | - | - | - | - | - | - | - | कण्ठोष्ठ्यम् |
| दन्तोष्ठम् | - | - | - | - | - | - | - | व् | - | दन्तोष्ठ्यम् |



unit 1.indd 5 22-03-2019 14:59:13

Lesson 2

## द्वितीयः पाठः

# महाकविः भारतीयार्

विश्वे विराजितेषु बहुषु द्रविडकविषु महाकविः भारतीयार् मुख्यः भवति । सः स्वकवितायाः माध्यमेन जनान् जागरितान् चकार । तमधिकृत्यैव परिचयः अस्मिन् पाठे प्रदत्तः विद्यते ।



भारतीयार् नामकः 1882 तमे वर्षे डिसम्बर् मासस्य 11 तमे दिनाङ्के तमिलनाडुप्रान्ते एट्टयपुरे जनिम् अलभत । अस्य पितरौ चिन्नस्वामी ऐयर्, लक्ष्मी च आस्ताम् । अयं केवलं स्वस्य एकादशतमे वयसि एव कवितारचनसामर्थ्यम् अप्रकाशयत्। अयं 1897 तमे वर्षे चेल्लम्माल् नामिकाम् अपरिणयत्। कञ्चित् कालं एट्टयपुरराजभवने कर्म अकरोत् । ततः स्वजीवने बहुत्र पत्रिकाचार्येण, मधुरैस्थले सेतुपति उच्चशिक्षा विद्यालये तमिल्भाषाबोधकत्वेन च कर्म अकरोत् ।

स्वमातृभाषाभिमानी सः "मयाधीतासु भाषासु तमिलभाषेव मधुरतमा भाषा कुत्रापि नास्ति " इति समुद्घोषयत् । अपि च संस्कृतम्, वङ्गालम्, हिन्दी, आंगलम् प्रभृति भाषासु नैपुण्यम् अप्राप्नोत् । ततः भगवद्गीता इत्यादि ग्रन्थान् स्वीकृत्य तमिलभाषायाम् अनुवादम् अकरोत् ।



unit 2.indd 6 22-03-2019 15:00:17

विशिष्य व्यासस्य महाभारतमकथाम्  आधारीकृत्य 'पाञ्चाली शपथम्' इति ग्रन्थम् अरचयत् । अयं 1904 तमे वर्षे सुदेशिमित्रन् इति पत्रिकायाम् उपाचार्यत्वेन कर्म अकरोत् । अपि च अनेकासु पत्रिकासु आचार्यपदवीम् अलङ्कृतवान् ।

अनेन कण्णन् पाट्टु, कुयिल् पाट्टु, देशीयगीतानि, स्वातन्त्र्यगीतानि इत्यादयः ग्रन्थाः रचिताः ।

स्वातन्त्र्यसमरसमये देशभावनाकवितां रचितवान् । तेन जनान् एकत्रीकृतवान् । अतः अयं देशकविः इति प्रसिद्धिम् अप्राप्नोत् । अपि च अस्य मातृभूमेः विश्वासः अत्यधिकः आसीत् ।

नूतनाः कविताः अनेन रचिताः। सर्वेषां जनानां सुखावबोधनाय आबालकात् वृद्धावस्थापर्यन्तं ज्ञानवर्धनाय अस्य कविताः उपकुर्वन्ति । स्त्रीस्वातन्त्र्याय अयं महत्तरं प्रयत्नं कृतवान् ।

अयं 1921 तमे वर्षे सेप्टम्बर् मासस्य 12 तमे दिनाङ्के मृतवान् ।

अमुं प्रशंसितुम् एट्टयपुरे भारतीमणिमण्डपं स्थापितं विद्यते । अत्रैव अस्य सप्तपदौन्नत्यघटिता प्रतिमा संस्थापिता।।

## अभ्यासः

### I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. कविता - ________________
2. राजभवने - ________________
3. उच्चशिक्षा - ________________
4. बोधकत्वेन - ________________
5. अभिमानी - ________________
6. भाषासु - ________________
7. नैपुण्यम् - ________________
8. अनुवादम् - ________________
9. पत्रिकायाम् - ________________
10. पदवीम् - ________________



unit 2.indd 7 22-03-2019 15:00:17

11. विश्वासः - ____________________

12. आबालकात् - ____________________

13. प्रयत्नम् - ____________________

14. प्रशंसितुम् - ____________________

15. प्रतिमा - ____________________

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. मधुरतमा × ____________________
2. नास्ति × ____________________
3. नैपुण्यम् × ____________________
4. प्रसिद्धिः × ____________________
5. अत्यधिकः × ____________________
6. महत्तरम् × ____________________
7. प्रशंसितुम् × ____________________
8. प्रयत्नः × ____________________
9. नूतनाः × ____________________
10. वृद्धावस्था × ____________________

## III. वाक्येषु प्रदत्तम् अव्ययपदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. चिन्नस्वामी ऐयर्, लक्ष्मी च आस्ताम्। ________
2. तमिलभाषेव मधुरतमा भाषा कुत्रापि नास्ति। ________
3. 'पाञ्चाली शपथम्' इति ग्रन्थम् अरचयत्। ________
4. एकादशमे वयसि एव कवितारचनसामर्थ्यम् अप्रकाशयत्। ________
5. अपि च अनेकासु पत्रिकासु आचार्यपदवीम् अलङ्कृतवान्। ________



unit 2.indd 8 22-03-2019 15:00:17

## IV. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. भारतीयार् नामकः कुत्र जनिम् अलभत ?
2. भारतीयार् महोदयस्य पितरौ कौ ?
3. भारतीयार् कुत्र तमिल्भाषाबोधकत्वेन कर्म अकरोत् ?
4. भारतीयार् महाकविः किं समुद्घोषयत् ?
5. भारतीयार् महाकविः कासु भाषासु नैपुण्यम् अप्राप्नोत् ?
6. भारतीयार् कान् ग्रन्थान् तमिलभाषायाम् अनुवादं कृतवान् ?
7. भारतीयार् महाकविः कस्यां पत्रिकायां उपाचार्यत्वेन कर्म अकरोत् ?
8. भारतीयार् महाकविना रचिताः ग्रन्थाः के ?
9. भारतीयार् महाकविः देशकवित्वेन कथं प्रसिद्धिं गतः ?
10. भारतीयार् महाकविं प्रशंसितुं का संस्थापिता ?

## V. सविस्तरम् उत्तरं लिखत-

1. भारतीयार् महाकविम् अधिकृत्य यथाग्रन्थं संक्षिप्य लिखत ।

**********************************

## ? पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### अन्ये तमिल् कवयः

भारतिदासः –

अयं 1891 तमे वर्षे एप्रैल् मासस्य 29 तमे दिनाङ्के जनिम् अलभत। अस्य कनकसभा सुब्बुरत्तिनम् इति प्रकृतिसिद्धं नामधेयम् । भारतीयार् महोदयस्य कविताभिः आकर्षितः एषः स्वयं भारतिदासः इति नाम चकार। अयं परिवर्तनकविः इति प्रसिद्धः । तिरुचिनगरे तन्नामकविश्वविद्यालयः उद्घाटितः । अयं तमिलभाषायाः बहून् अंशान् स्वीकृत्य कविताः अरचयत्। चलचित्रे अपि तस्य कविताः योजिताः दृश्यन्ते ।

### कविमणि देशिकविनायकम् पिल्लै

अयं 1876 तमे वर्षे जूलै मासस्य 27 तमे दिनाङ्के अजायत। एषः कन्याकुमर्याः तेरूर् ग्रामे अजायत । ஆசிய ஜோதி, நாஞ்சில் நாட்டு மருமக்கள் एवं ओमर् काव्यानुवादः इत्याद्यः अस्य प्रसिद्धाः रचनाः । अयं तमिल्संघस्य सप्तमवार्षिकोत्सवे 'कविमणि' इति विरुदेन सम्मानितः

### भारतीयार् कृतयः

#### देशियगीतानि

1. பாரதநாடு,
2. தமிழ்நாடு,
3. சுதந்திரம்,
4. தேசிய இயக்கப் பாடல்கள்
5. தேசியத் தலைவர்கள்,
6. பிறநாடுகள் (மாஜினியின் சபதம், புதிய ருஷியா)

#### दैवगीतानि

1. நீதி,
2. சமூகம்,
3. தனிப் பாடல்கள்,
4. சான்றோர்,
5. சுயசரிதை,
6. வசன கவிதை

#### महत्त्रयगीतानि

1. கண்ணன் பாட்டு
2. பஞ்சாலி சபதம்
3. குயில் பாட்டு

## व्याकरण-अभ्यासः - 1

### अजन्तपुल्लिङ्गशब्दाः

### इकारान्तः पुल्लिङ्गः"हरि" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |
| सम्बोधन-प्रथमा | हे हरे ! | हे हरी ! | हे हरयः ! |

### इकारन्तः पुल्लिङ्गः "रवि" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रविः | रवी | रवयः |
| द्वितीया | रविम् | रवी | रवीन् |
| तृतीया | रविणा | रविभ्याम् | रविभिः |
| चतुर्थी | रवये | रविभ्याम् | रविभ्यः |
| पञ्चमी | रवेः | रविभ्याम् | रविभ्यः |
| षष्ठी | रवेः | रव्योः | रवीणाम् |
| सप्तमी | रवौ | रव्योः | रविषु |



unit 2.indd 11 22-03-2019 15:00:18

| | | | |
|---|---|---|---|
| सम्बोधन-प्रथमा | हे रवे ! | हे रवी ! | हे रवयः ! |

## इकारान्तः पुल्लिङ्गः "कवि" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कविः | कवी | कवयः |
| द्वितीया | कविम् | कवी | कवीन् |
| तृतीया | कविना | कविभ्याम् | कविभिः |
| चतुर्थी | कवये | कविभ्याम् | कविभ्यः |
| पञ्चमी | कवेः | कविभ्याम् | कविभ्यः |
| षष्ठी | कवेः | कव्योः | कवीनाम् |
| सप्तमी | कवौ | कव्योः | कविषु |
| सम्बोधन-प्रथमा | हे कवे ! | हे कवी ! | हे कवयः ! |

## इकारान्तः पुल्लिङ्गः "पति" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पतिः | पती | पतयः |
| द्वितीया | पतिम् | पती | पतीन् |
| तृतीया | पत्या | पतिभ्याम् | पतिभिः |
| चतुर्थी | पत्यै | पतिभ्याम् | पतिभ्यः |
| पञ्चमी | पत्युः | पतिभ्याम् | पतिभ्यः |
| षष्ठी | पत्युः | पत्योः | पतीनाम् |
| सप्तमी | पत्यौ | पत्योः | पतिषु |
| सम्बोधन-प्रथमा | हे पते ! | हे पती ! | हे पतयः ! |



unit 2.indd 12 22-03-2019 15:00:18

Lesson 3

तृतीयः पाठः

# संस्कृतगीतम्

विश्वे विराजमानासु भाषासु संस्कृतभाषा सुमधुरा सुललिता भवति। इयं भाषा तावत् सर्वेषां चित्तम् आकर्षयति। तत्र कारणं किमिति जिज्ञासायाः उत्तरत्वेन अयं पाठ्यभागः प्रदत्तः विद्यते।




## (i) वाणीं भज रे

वाणीं भज रे वाणीं

गैर्वाणीं भज रे वाणीम् ।। वाणीं ।।

शुक – पिक – मधुर – निनादम्

वाणी – वीणा – वादम्



unit 3.indd 13 22-03-2019 15:01:10

मोहन – मुरली – नादम्

विस्मारयतीयं वाणी ।।वाणीं ।।

वेद – वाद – वाणीयम्

वाल्मीकि – मधुर – वाणीयम्

व्यास – भास - वाणीयम्

कवि – कालिदास-वाणीयम् ।।वाणीं ।।

## (ii) हे रसने

ब्रूहि ब्रूहि मधुरं रसने

मा कदाऽपि कटु हे रसने

न मृषा ब्रूहि प्रियं रसने

मा प्रियसत्यं वद रसने ।।ब्रूहि।।

सम्यक्पूर्वं वद रसने

सुष्ठु सस्मितं वद रसने

शिष्टैस्सह मा वद रसने

दुष्टैस्सह मा वद रसने ।।ब्रूहि।।

वन्दे मातरमनिशमिति

वाणी किल गैर्वाणीति

मनसा गीतं गीतमिति

अन्यदगीतमगीतमिति ।।ब्रूहि।।



unit 3.indd 14 22-03-2019 15:01:11

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. वाणी - ______________
2. शुकः - ______________
3. पिकः - ______________
4. निनादम् - ______________
5. मुरली - ______________
6. कविः - ______________
7. कदा - ______________
8. प्रियम् - ______________
9. सत्यम् - ______________
10. मनः - ______________
11. वन्दे - ______________
12. पूर्वम् - ______________

### II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. विस्मरति × ______________
2. कटु × ______________
3. अप्रियम् × ______________
4. सुष्ठु × ______________
5. शिष्टैः × ______________
6. पूर्वम् × ______________
7. सत्यम् × ______________
8. सम्यक् × ______________



unit 3.indd 15 22-03-2019 15:01:11

## III. सन्धिच्छेदं कुरुत-

1. कदाऽपि - ________ + ________
2. शिष्टैस्सह - ________ + ________
3. दुष्टैस्सह - ________ + ________
4. अनिशमिति - ________ + ________
5. गैर्वाणीति - ________ + ________
6. गीतमिति - ________ + ________
7. अगीतमिति - ________ + ________
8. अन्यदगीतम् - ________ + ________

## IV. श्लोकं पूरयत-

1. शुक – पिक – मधुर ________
   ________ ________ वादम्
   मोहन ________ नादम्
   ________ वाणी
2. वेद ________ वाणीयम्
   ________ मधुर वाणीयम्
   व्यास – भास ________
   कवि कालिदास ________
3. ________ मातरमनिशमिति
   वाणी ________ गैर्वाणीति
   मनसा गीतं ________
   ________ ________ मगीतमिति



unit 3.indd 16 22-03-2019 15:01:11

## V. अधोलिखितानां प्रश्नानाम् उत्तरं लिखत-

1. कां भज ?
2. शुकपिकयोः निनादः कीदृशः ?
3. इयं वाणी कं विस्मारयति ?
4. कस्य ऋषेः मधुरवाणीयम् ?
5. कस्य कवेः वाणीयम् ?
6. रसने कथं ब्रूहि ?
7. रसने कदापि किं न ब्रूहि ?
8. कीदृशं सत्यं न ब्रूहि ?
9. काम् अनिशं वन्दे ?
10. गीतम् अगीतं च किम् ?

## VI. सविस्तरम् उत्तरं लिखत-

1. गैर्वाण्याः महत्वं यथाग्रन्थं वर्णयत ।
2. रसने किं ब्रूयात् किं न ब्रूयात् इति विशदयत ।

*********************************

### पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

1. सत्यं ब्रूयात्प्रियं ब्रूयान्नब्रूयात्सत्यमप्रियम् ।
   प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ।।
2. केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्जलाः
   न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
   वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
   क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।।
3. सुभाषितेन गीतेन युवतीनां च लीलया ।
   मनो न भिद्यते यस्य स योगी ह्यथवा पशुः ।।
4. विना मद्यं विना मासं परस्वहरणं विना ।
   विना परापवादेन दिविरो दिवि रोदिति ।।
5. पातु वो निकषग्रावा मतिहेम्नः सरस्वती ।
   प्राज्ञेतरपरिच्छेदं वचसैव करोति वा ।।



unit 3.indd 17 22-03-2019 15:01:11

## पाठ्यातिरिक्तः व्याकरणविषयः

### माहेश्वराणि सूत्राणि

अ इ उ ण्
ऋ ऌ क्
ए ओ ङ्
ऐ औ च्
ह य व र ट्
ल ण्
ञ म ङ ण न म्
झ भ ञ्
घ ढ ध ष्
ज ब ग ड द श्
ख फ छ ठ थ च ट त व्
क प य्
श ष स र्
ह ल्

### प्रत्याहारः

प्रत्याह्रियन्ते वर्णाः अस्मिन् अनेन वा इति प्रत्याहारः।

यथा

1. अण् - अ इ उ
2. अक् - अ इ उ ऋ ऌ
3. इक् - इ उ ऋ ऌ
4. एङ् - ए ओ
5. अच् - अ इ उ ऋ ऌ ए ओ ऐ औ
6. ऐच् - ऐ औ
7. यण् - य व र ल
8. हश् - ह य व र ल ञ म ङ ण न
झ भ घ ढ ध ज ब ग ड द

एवं यट्, झट्, खट्, चर्, झल् इत्यादयः सन्ति ॥



unit 3.indd 18 22-03-2019 15:01:12

Lesson **4** चतुर्थः पाठः

# उत्तमकवयः

धर्मस्य तत्वं निहितं गुहायाम् इत्युक्तिः वर्तते । ये तत्वज्ञानाय महान्तः ऋषयः प्रायतन्त, तेषु वाल्मीक्यादयः ऋषयः स्वकाव्येषु जनान् अवबोधयितुं धर्मस्य सारम् अलिखन् । विशिष्य कालिदासादि – कवयः स्वविशिष्टचिन्तनपुरस्सरं कथामाध्यमेन धर्मं संबोध्य जनान् आकर्षयन्ति स्म । अतः अस्मिन् पाठ्यभागे कतपयेषां कवीनां परिचयः दीयते ।।

## कालिदासः



कालिदासः संस्कृतकाव्यपरम्परायां महाकविः वर्तते । सः कविकुलगुरुः इति प्रसिद्धः । पाश्चात्याः विदुषः अमुं भारतीयशेक्स्पियर् इति प्रशंसन्ति । सः विक्रमादित्यस्य नवरत्नेषु अन्यतमः आसीत् । अस्य कालः विक्रमपूर्वद्वादशशतकमारभ्य विक्रमानन्तर-षष्ठशतकपर्यन्तम् इति समालोचकाः मन्यन्ते । अयं काश्मीरे जनिं प्राप्य उज्जियिन्यां स्वजीवनं यापितवान् इति पण्डिताः वदन्ति । अयं रघुवंशम्, कुमारसंभवम्, मेघदूतम्, ऋतुसंहारः इति श्रव्यकाव्यानि, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् इति दृश्यकाव्यानि (नाटकानि) च अरचयत् । अयम् उपमालङ्कारप्रयोगे अतीव निपुणः आसीत् । अत एवोच्यते - "उपमा कालिदासस्य" इति।



unit 4.indd 19 22-03-2019 15:01:58

## भारविः



भारवेः जन्मनाम दामोदरः । एतस्य पिता नारायणस्वामी । अयं क्रिस्तोः षष्ठशतके आसीत् । केचन अयं दाक्षिणात्यः इति वदन्ति । केचन उत्तरखण्डे आसीत् इति वदन्ति । अयं माघपूर्ववर्ती कालिदासपरवर्ती च । अयं किरातर्जुनीयम् इति महाकाव्यम् अरचयत्। अल्पाल्पैः पदैः बृहत्तरम् अर्थं बोधयति अयं कविः। अत एवोच्यते - "भारवेरर्थगौरवम्" इति।

## भासः



भासः संस्कृतसाहित्ये प्रसिद्धः प्रथमः नाटककारः । अस्य देशकालयोः विषये निश्चयः नास्ति । किन्तु अयं कालिदासादपि पूर्वतनः कविः आसीत् । अस्य कृतित्वेन त्रयोदश नाटकानि समुपलभ्यन्ते । तानि प्रतिज्ञायौगन्धरायणम्स्व, प्रवासवदत्तम्, ऊरुभङ्गम्, दूतवाक्यम्, पञ्चरात्रम्, बालचरितम्, दूतघटोत्कचम्, कर्णभारम्, मध्यमव्यायोगः, प्रतिमानाटकम्, अभिषेकनाटकम्, अविमारकम्, चारुदत्तम् इति । एतानि समग्रतया भासनाटकचक्रम् इति कथ्यते। अस्य भाषा सरला, सुबोधा, सरसा च भवति। रामायणकथां महाभारतकथां च स्वीकृत्य तेन नाटकानि रचितानि । सर्वाणि नाटकानि सरलानि मनोहराणि च वर्तन्ते । अत एवोच्यते - "भासो हासः" इति ।



unit 4.indd 20 22-03-2019 15:01:58

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. परम्परायाम् - ____________
2. पाश्चात्याः - ____________
3. समालोचकाः - ____________
4. पण्डिताः - ____________
5. महाकाव्यम् - ____________
6. जीवनम् - ____________
7. उपमा - ____________
8. नाम - ____________
9. बोधयति - ____________
10. सरला - ____________
11. सरसा - ____________
12. मनोहराणि - ____________

### II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. प्रसिद्धः × ____________
2. श्रव्यम् × ____________
3. निपुणः × ____________
4. दाक्षिणात्यः × ____________
5. अल्पैः × ____________
6. बृहत्तरम् × ____________
7. निश्चयः × ____________
8. उपलभ्यन्ते × ____________



unit 4.indd 21 22-03-2019 15:01:59

9. सरला × ____________________

10. सुबोधा × ____________________

## III. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. कालिदासः कीदृशः वर्तते ?
2. कालिदासः किमिति प्रसिद्धः ?
3. कालिदासः कुत्र जनिं प्राप्तवान् ?
4. कालिदासेन विरचितानि श्रव्यकाव्यानि कानि ?
5. कालिदासेन विरचितानि दृश्यकाव्यानि कानि ?
6. कालिदासः कस्मिन् अलङ्कारे निपुणः आसीत् ?
7. भारवेः पिता कः ?
8. भारविना विरचितं महाकाव्यं किम् ?
9. भारविः कथम् अर्थं बोधयति ?
10. संस्कृतसाहित्ये भासः कतमः भवति ?
11. भासः कस्मादपि पूर्वतनः कविः ?
12. भासेन कति नाटकानि विरचितानि ?

## IV. सविस्तरम् उत्तरं लिखत-

1. कालिदासस्य परिचयं यथाग्रन्थं लिखत।
2. भारवेः परिचयं यथाग्रन्थं लिखत।
3. महाकविभासमधिकृत्य यथामति लिखत।



unit 4.indd 22 22-03-2019 15:01:59

## V. कोष्ठे प्रदत्तनि काव्यानि स्वीकृत्य उचिते स्थाने पूरयत ।

| | |
|---|---|
| मालविकाग्निमित्रम् | किरातार्जुनीयम् |
| प्रतिमानाटकम् | विक्रमोर्वशीयम् |
| रघुवंशम् | कर्णभारम् |
| कुमारसंभवम् | मेघदूतम् |
| ऋतुसंहारः | अभिज्ञानशाकुन्तलम् |

| | श्रव्यकाव्यानि | दृश्यकाव्यानि |
|---|---|---|
| 1. | ______________ | ______________ |
| 2. | ______________ | ______________ |
| 3. | ______________ | ______________ |
| 4. | ______________ | ______________ |
| 5. | ______________ | ______________ |

*********************************

## पाठ्यप्रश्नातिरिक्ताःज्ञातव्यविषयाः

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

कालिदासं प्रति

कवयः कालिदासाद्याः
कवयो वयमप्यमी।
पर्वते परमाणौ च
पदार्थत्वं प्रतिष्ठितम् ।।
कविरमरः कविरचलः
कविरभिनन्दश्च कालिदासश्च ।
अन्ये कवयः कपयः
चापलमात्रं परं दधति ।।



unit 4.indd 23 22-03-2019 15:01:59

पुरा कवीनां गणनाप्रसङ्गे
कनिष्ठिकाधिष्ठितकालिदासा ।
अद्यापि तत्तुल्यकवेरभावात्
अनामिका सार्थवती बभूव ।।

भारविं प्रति

नारिकेलफलसम्मितं वचो
भारवेः सपदि तद् विभज्यते।
स्वादयन्तु रसगर्भनिर्भरं
सारमस्य रसिका यथेप्सितम् ।।

माघेन विघ्नितोत्साहा
नोत्सहन्ते पदक्रमे ।
स्मरन्तो भारवेरेव
कवयः कपयो यथा ।।

उपमा कालिदासस्य
भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं
माघे सन्ति त्रयो गुणाः ।।

भासं प्रति

सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ।।
भासो हासः सरस्वत्या नाटकैरमृतौपमैः ।
नाट्यवाङ्मयव्योमेन्दुः शास्त्रज्योतिर्विभास्वरः ।।



unit 4.indd 24 22-03-2019 15:01:59

## व्याकरण-अभ्यासः – 2

### धातुः – परस्मैपदी - लङ् (Past Tense)

#### पठ् – to read

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

#### गम्(गच्छ्) – to go

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अगच्छत् | अगच्छताम् | अगच्छान् |
| मध्यमपुरुषः | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तमपुरुषः | अगच्छम् | अगच्छाव | अगच्छाम |

#### लिख् – to write

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अलिखत् | अलिखताम् | अलिखन् |
| मध्यमपुरुषः | अलिखः | अलिखतम् | अलिखत |
| उत्तमपुरुषः | अलिखम् | अलिखाव | अलिखाम |



unit 4.indd 25 22-03-2019 15:02:00

Lesson 5 पञ्चमः पाठः

# सुभाषितानि

लोके मानवानां सच्चरित्रनिर्माणाय, यद्यपि कोट्यधिकाः ग्रन्थाः सन्ति, तथापि सुभाषितानि अतीव सरलानि सन्तः जनान् आकर्षयन्ति । ततः केचन श्लोकाः छात्रक्षेमाय अस्मिन् पाठे प्रदत्ताः विद्यन्ते ॥



## साधुः -

यथा चित्तं तथा वाचा यथा वाचा तथा क्रिया ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥ 1

## सन्मार्गः -

कर्तव्यमेव कर्तव्यं प्राणैः कण्ठगतैरपि ।
अकार्यं नैव कर्तव्यं प्राणैः कण्ठगतैरपि ॥ 2

## सत्यसंगतिः -

सद्भिरेव सहासीत सद्भिः कुर्वीत संगतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥ 3



unit 5.indd 26 22-03-2019 15:02:49

## सत्यम् -

सत्यान्नास्ति परो धर्मः सत्यान्नास्ति परं तपः ।
सत्यान्नास्ति परो योगः सत्यान्नास्ति परं पदम् ॥ 4

## बुद्धिः -

अनारम्भो हि कार्याणां प्रथमं बुद्धिलक्षणम् ।
आरब्धस्यान्तगामित्वं द्वितीयं बुद्धिलक्षणम् ॥ 5

## जीवितम् -

यस्मिञ्जीवति जीवन्ति बहवः स तु जीवति ।
काकोऽपि किं न कुरुते चंच्वा स्वोदरपूरणम् ॥ 6

## सुपुत्रः -

एकेनापि सुपुत्रेण विद्यायुक्तेन भासते ।
कुलं पुरुषसिंहेन चन्द्रेणेव विभावरी ॥ 7

## धनवान् -

पूज्यते यदपूज्योऽपि यदगम्योऽपि गम्यते ।
वन्द्यते यदवन्द्योऽपि स प्रभावो धनस्य हि ॥ 8

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. चित्तम् - ____________________
2. प्राणः - ____________________
3. मैत्रीम् - ____________________
4. धर्मः - ____________________



unit 5.indd 27 22-03-2019 15:02:50

5. तपः - ______________________

6. योगः - ______________________

7. बुद्धिः - ______________________

8. काकः - ______________________

9. पुत्रः - ______________________

10. विद्या - ______________________

11. चन्द्रः - ______________________

12. सिंहः - ______________________

13. धनवान् - ______________________

14. बहवः - ______________________

15. विवादम् - ______________________

## II. अधो लिखितानां पदानां व्यतिरेकपदानि लिखत-

1. क्रिया × ______________________

2. एकरूपता × ______________________

3. अकार्यम् × ______________________

4. सद्भिः × ______________________

5. नास्ति × ______________________

6. अनारम्भः × ______________________

7. बहवः × ______________________

8. सुपुत्रः × ______________________

9. धनवान् × ______________________

10. आचरेत् × ______________________



unit 5.indd 28 22-03-2019 15:02:50

## III. सन्धिच्छेदं कुरुत-

1. साधूनामेकरूपता- _______ + ________
2. कर्तव्यमेव - _______ + ________
3. कण्ठगतैरपि - _______ + ________
4. सद्भिरेव - _______ + ________
5. किञ्चिदाचरेत् - _______ + ________
6. सत्यान्नास्ति - _______ + ________
7. यस्मिञ्जीवति - _______ + ________

## IV. सन्धिं कुरुत-

1. न + असद्भिः = __________
2. सद्भिः + विवादम् = __________
3. न + एव = __________
4. बकः + अपि = __________
5. यत् + अपूज्यः = __________
6. अगम्यः + अपि = __________
7. यत् + अवन्द्यः + अपि = __________

## V. श्लोकं पूरयत–

1. यथा चित्तं तथा वाचा __________ __________क्रिया।

   __________ वाचि क्रियायां च __________ ।।

2. सत्यान्नास्ति परो धर्मः __________ ।

   __________ सन्यान्नास्ति परं पदम् ।।

3. __________ बहवः स तु जीवति।

   बकोऽपि किं न कुरुते __________ ।।

4. पूज्यते यदपूज्योऽपि यदगम्योऽपि गम्यते ।

__________ यदवन्द्योऽपि ____________ धनस्य हि ॥

5. एकेनापि सुपुत्रेण __________ __________ ।

कुलं पुरुषसिंहेन __________ __________ ॥

## VI. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. केषां एकरूपता भवति ?
2. कण्ठगतैरपि नैव कर्तव्यं किम् ?
3. केन सह संगतिः कर्तव्या ?
4. बुद्धेः प्रथमलक्षणं किम् ?
5. कस्मात् परो धर्मः परं तपः च नास्ति ?
6. वस्तुतः कः जीवति ?
7. काकः किं कुरुते ?
8. कुलं केन भासते ?
9. विभावरी केन प्रकाशते ?
10. धनस्य प्रभावः कः ?

## VII. सविस्तरम् उत्तरं लिखत-

1. विवृणुत - (i) साधुः (ii) सत्संगतिः (iii) बुद्धिः
2. विशदयत - (i) सन्मार्गः (ii) सत्यम् (iii) जीवितम्
3. टिप्पणीं लिखत - (i) सुपुत्रः (ii) धनवान् (iii) सन्मार्गः

## VIII. मातृभाषायाम् अनुवादं कुरुत-

1. सत्यान्नास्ति परो धर्मः सत्यान्नास्ति परं तपः ।
   सत्यान्नास्ति परो योगः सत्यान्नास्ति परं पदम् ॥
2. एकेनापि सुपुत्रेण विद्यायुक्तेन भासते ।
   कुलं पुरुषसिंहेन चन्द्रेणेव विभावरी ॥

**********************************



unit 5.indd 30 22-03-2019 15:02:50

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

सुभाषितसूक्तयः -

1. अहिंसो परमो धर्मः ।
2. संसर्गजा दोषगुणाः भवन्ति ।
3. मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
4. सत्यं जयति नानृतम् ।
5. बुद्धिर्यस्य बलं तस्य ।
6. सुपुत्रः कुलदीपकः ।
7. सर्वे गुणाः काञ्चनमाश्रयन्ति ।

श्लोकाः -

त्यज दुर्जनसंसर्गं, भज साधुसमागमम् ।
कुरु पुण्यमहोरात्रं, स्मर नित्यमनित्यताम् ।। 1

निन्दन्तु नीतिनिपुणाः यदि वा स्तवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ।। 2

सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते ।
स सद्भिः सह कर्तव्यः सतां सङ्गो न भेषजम् ।। 3

सत्सङ्गाद् भवति हि साधुता खलानाम् ।
साधूनां नहि खलसङ्गमात् खलत्वम् ।। 4

प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रैलोक्ये दीपको धर्मः सुपुत्रः कुलदीपकः ।। 5

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ।। 6



unit 5.indd 31 22-03-2019 15:02:50

## पाठ्यातिरिक्तः व्याकरणविषयः

### अव्ययानि

| | अव्ययानि | | उदाहरणम् |
|---|---|---|---|
| 1. | यत्र – तत्र | - | सः यत्र गच्छति, तत्र खादति । |
| 2. | सर्वत्र | - | ईश्वरः सर्वत्र अस्ति । |
| 3. | अत्र | - | त्वम् अत्र आगच्छ । |
| 4. | कुत्र | - | छात्राः कुत्र अगच्छन् ? |
| 5. | अन्यत्र | - | त्वम् अन्यत्र तिष्ठ । |
| 6. | इतः | - | त्वम् इतः गच्छ । |
| 7. | ततः | - | सीता ततः आगच्छति । |
| 8. | इतस्ततः | - | वानरः इतस्ततः धावति । |
| 9. | कुतः | - | गङ्गा कुतः उद्भवति ? |
| 10. | उपरि | - | धूमः उपरि गच्छति । |

एवं नीचैः, अधः, बहिः, परितः, उभयतः, सर्वतः इत्यादीनि

### कालवाचकानि अव्ययानि

| | | | |
|---|---|---|---|
| 1. | अधुना | - | त्वम् अधुना किं करोषि ? |
| 2. | इदानीम् | - | अहम् इदानीं पाठं पठामि । |
| 3. | ह्यः | - | ह्यः अहं जन्तुशालाम् अगच्छम् । |
| 4. | अद्यः | - | अद्य शनिवासरः । |
| 5. | श्वः | - | श्वः त्वं कुत्र गमिष्यसि ? |
| 6. | परश्वः | - | परश्वः दीपावली अस्ति । |

एवं संप्रति, पुरा, यदा-तदा, कदा, सदा, सर्वदा इत्यादीनि



unit 5.indd 32 22-03-2019 15:02:50

## प्रश्नवाचकानि अव्ययानि

| अव्ययानि | | उदाहरणम् |
|---|---|---|
| 1. कदा | - | सः कदा आगच्छति ? |
| 2. किमर्थम् | - | त्वं तत्र किमर्थं गच्छसि ? |
| 3. कुत्र | - | रामः कुत्र वसति ? |
| 4. कुतः | - | सत्यभामा कुतः आगच्छति ? |
| 5. कथम् | - | राघवः कथं गच्छति ? |
| 6. कति | - | तत्र कति वृक्षाः सन्ति ? |

## क्रियाविशेषणबोधकानि अव्ययानि

1. शनैः शनैः - हंसः शनैः शनैः चलति ।
2. शीघ्रम् - त्वं शीघ्रम् आगच्छ ।
3. उच्चैः - मेघाः उच्चैः गर्जन्ति ।
4. मन्दम् - कच्छपः मन्दं गच्छति ।
5. सहसा - कृष्णः सहसा खादति ।

## समुच्चयार्थकानि अव्ययानि

1. अपि - सः अपि आगच्छति ।
2. च - गोविन्दः कृष्णः च पाठं पठतः ।
3. तु - सः तु अत्रैव पठति ।

## अन्य – अव्ययानि

1. एव - मुकुन्दः एव पाठं पठति ।
2. खलु - अयं खलु चौरः अस्ति ।
3. वृथा - समुद्रे वृष्टिः वृथा भवति ।
4. सत्वरम् - रमेशः सत्वरं कार्यं करोति ।
5. विना - विद्यया विना मानवः न शोभते ।
6. यावत् – तावत् - यावत् गोपालः भाषणं यच्छति तावत् अत्र एव तिष्ठ।
7. इव - सः वैभवः इव वदति ।
8. मा - तत्र मा गच्छ ।
9. एकदा - एकदा अहं ग्रामम् अगच्छम् ।
10. न - असत्यं न वद ।



unit 5.indd 33 22-03-2019 15:02:50

Lesson 6

षष्ठः पाठः

# प्रत्यक्षदेवताः

'मातृदेवो भव', 'पितृ देवो भवः' 'आचार्यदेवो भव' इति वेदवाक्यानि। माता, पिता, आचार्यः च एते त्रयः प्रत्यक्षे वर्तमानाः देवताः भवन्ति । ते अस्माकं उन्नतये सर्वदा यतन्ते। अस्मान् पोषणे रक्षणे च सर्वदा निरताः भवन्ति ।

## माता



माता अस्माकं कृते जीवनं ददाति । मातरं विना कस्यापि जन्म न वर्तते। माता सर्वदा स्वकुटुम्बपोषणे चिन्तातुरा भवति। सा स्वपुत्ररक्षणाय अनेकान् कष्टान् सहते । "कुपुत्रो जायेत क्वचिदपि कुमाता नैव भवति" इति साधूनां वचनम्। तथैव माता वार्धक्येऽपि पुत्रे पुत्रत्वेन एव पश्यति। माता स्वजीवनपर्यन्तं कुटुम्बपोषणे निमग्ना भवति ।

## पिता



पिता अस्माकं कृते ज्ञानं प्रयच्छति । मातुः अनन्तरं कुटुम्बरक्षणे सर्वदा यतते। स एव उत्तरदायित्वं वहति। सः स्वपुत्रेभ्यः विनयं शिक्षयति। सर्वदा पुत्राय हितं करोति। विद्याभ्यासे उचितं विद्यालयं, अध्यापकं च आलोच्य तत्र विद्याभ्यासाय स्वपुत्रं स्थापयति। अपि च कुटुम्बभारं वहति।

## आचार्यः



आचिनोति हि शास्त्रार्थान् आचारे स्थापयत्यपि।
स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते ।।

आचार्यशब्दस्य गुरुः इति नामान्तरम् अस्ति । आचार्यः छात्राणां कृते ज्ञानवर्धनं करोति। अज्ञानं तिरस्कृत्य ज्ञानं प्रयच्छति । तथा चोक्तम् –



unit 6.indd 34 22-03-2019 15:03:33

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।। इति ।

छात्रान् सन्मार्गनयने, सकलविधज्ञानसंपादने, विनयप्राप्तये, धर्माचरणे च आचार्यः सर्वदा यतमानः अस्ति । आचार्यः मनुष्ये मनुष्यत्वं प्राप्तुं निरतः भवति । भविष्यकालसच्छात्रनिर्माणे अयं स्रष्टा भवति।

एते त्रयः अस्माकं प्रत्यक्षे विद्यमानाः देवताः भवन्ति । ताः अस्माकम् इच्छापूर्तये सर्वदा यतन्तः स्वजीवनं यापयन्ति । अतः वयं सश्रद्धम् एताः देवताः सगौरवं संपूजयेम ।।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. प्रत्यक्षे - ____________
2. देवताः - ____________
3. उन्नतये - ____________
4. सर्वदा - ____________
5. विना - ____________
6. पोषणे - ____________
7. चिन्तातुरा - ____________
8. वार्धक्ये - ____________
9. निमग्ना - ____________
10. विनयम् - ____________
11. भारम् - ____________
12. तिरस्कृत्य - ____________
13. मार्गः - ____________
14. आचरणे - ____________
15. स्रष्टा - ____________



unit 6.indd 35 22-03-2019 15:03:33

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. आतुरा × ____________________
2. सर्वदा × ____________________
3. कुपुत्रः × ____________________
4. वर्धनम् × ____________________
5. उन्मीलितम् × ____________________
6. सन्मार्गः × ____________________
7. अज्ञानम् × ____________________
8. अन्धः × ____________________
9. आचरणे × ____________________
10. पूर्तये × ____________________

## III. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. प्रत्यक्षे वर्तमानाः देवताः काः ?
2. का अस्माकं कृते जीवनं ददाति ?
3. माता स्वपुत्ररक्षणाय कान् सहते ?
4. मातरमधिकृत्य साधूनाम् उक्तं वचनं किम् ?
5. मातुः अनन्तरं कुटुम्बरक्षणे कः सर्वदा यतते ?
6. पिता स्वपुत्रेभ्यः किं शिक्षयति ?
7. आचार्यशब्दस्य नामान्तरं किम् ?
8. आचार्यः छात्राणां कृते किं करोति ?
9. कस्य निर्माणे आचार्यः स्रष्टा भवति ?
10. वयं कथं प्रत्यक्षदेवताः संपूजयेम ?



unit 6.indd 36 22-03-2019 15:03:33

## IV. सविस्तरम् उत्तरं लिखत-

1. मातुः महत्वं यथाग्रन्थं लिखत।
2. पितुः महत्वं ग्रन्थानुसारं लिखत।
3. आचार्यस्य महिमानं यथाग्रन्थं वर्णयत।

## V. पाठात् अव्ययपदानि चित्वा रिक्तस्थाने लिखत-

1. ____________
2. ____________
3. ____________
4. ____________
5. ____________

*********************************

## ? पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### मातुः महत्वम्

- सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते।
- यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम्।
  न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि॥
- माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः॥
- तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा।
  तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते॥
- अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
  चत्वारि सम्प्रवर्धन्ते आयुर्विद्यायशो बलम्।
- दशाचार्यानुपाध्यायः उपाध्यायान् पिता दश।
  पितॄन् दश तु मातैका सर्वां वा पृथिवीमपि॥
  रवित्वेनाभिभवति नास्ति मातृसमो गुरुः॥
- कुक्षौ सन्धारणाद् धात्री जननाज्जननी तथा।
  अङ्गानां वर्धनादम्बा वीरसूत्वेन वीरसूः॥
  शिशोः शुश्रूणाच्छक्तिर्माता स्यान्माननाच्च सा॥



unit 6.indd 37 22-03-2019 15:03:34

## व्याकरण-अभ्यासः - 3

### अजन्तस्त्रीलिङ्गशब्दाः

### इकारान्तः स्त्रीलिङ्गः "मति" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिं | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै, मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः, मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः, मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्, मतौ | मत्योः | मतिषु |
| सम्बोधन-प्रथमा | हे मते ! | हे मती ! | हे मतयः ! |

### इकारान्तः स्त्रीलिङ्गः "श्रुति" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | श्रुतिः | श्रुती | श्रुतयः |
| द्वितीया | श्रुतिम् | श्रुती | श्रुतीः |
| तृतीया | श्रुत्या | श्रुतिभ्याम् | श्रुतिभिः |
| चतुर्थी | श्रुत्यै-श्रुतये | श्रुतिभ्याम् | श्रुतिभ्यः |
| पञ्चमी | श्रुत्याः-श्रुतेः | श्रुतिभ्याम् | श्रुतिभ्यः |
| षष्ठी | श्रुत्याः-श्रुतेः | श्रुत्योः | श्रुतीनाम् |
| सप्तमी | श्रुत्याम्-श्रुतौ | श्रुत्योः | श्रुतिषु |



unit 6.indd 38 22-03-2019 15:03:34

| | | | |
|---|---|---|---|
| सम्बोधन-प्रथमा | हे श्रुते ! | हे श्रुती ! | हे श्रुतयः ! |

## ईकारान्तः स्त्रीलिङ्गः "नदी" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| द्वितीया | नदीम् | नद्यौ | नदीः |
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्यः |
| पञ्चमी | नद्याः | नदीभ्याम् | नदीभ्यः |
| षष्ठी | नद्याः | नद्योः | नदीनाम् |
| सप्तमी | नद्याम् | नद्योः | नदीषु |
| सम्बोधन-प्रथमा | हे नदि ! | हे नद्यौ ! | हे नद्यः ! |

## ईकारान्तः स्त्रीलिङ्गः "गौरी" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गौरी | गौर्यौ | गौर्यः |
| द्वितीया | गौरीम् | गौर्यौ | गौरीः |
| तृतीया | गौर्या | गौरीभ्याम् | गौरीभिः |
| चतुर्थी | गौर्यै | गौरीभ्याम् | गौरीभ्यः |
| पञ्चमी | गौर्याः | गौरीभ्याम् | गौरीभ्यः |
| षष्ठी | गौर्याः | गौर्योः | गौरीणाम् |
| सप्तमी | गौर्याम् | गौर्योः | गौरीषु |
| सम्बोधन-प्रथमा | हे गौरि ! | हे गौर्यौ ! | हे गौर्यः ! |



unit 6.indd 39 22-03-2019 15:03:34

Lesson **7** सप्तमः पाठः

# दिक्–परिचयः

पिता - मधुसूदन ! अद्य पाठशालायां किमपठः ?

मधु - पितः ! अद्य मम उपाध्यायः दिशः उद्दिश्य अबोधयत् ।

पिता - यत् अबोधयत् तत् स्मरसि वा ?

मधु - बाढम् । स्मरामि ।

पिता - तथा चेत् दिशां ज्ञानोपायं विशदय ।






मधु - अहं सूर्य-उदयकाले सूर्य-अभिमुखं तिष्ठामि । बाहुं प्रसारयामि । तदा ममाग्रे विद्यमाना दिक् प्राची । पश्चात् भागे विद्यमाना दिक् प्रतीची । मम दक्षिणबाहुः दक्षिणां दिशं सूचयति । वामबाहुः च उत्तरां दिशं सूचयति ।

पिता - साधु, त्वदुक्तं साधु । तव उपाध्यायः दिशां ज्ञानाय समीचीनम् उपायम् अबोधयत् ।

मधु - तर्हि तात, सूर्यः सर्वदा प्राच्यामेव दिशि उदेति । चन्द्रस्तु कदाचित् प्राच्यां, कदाचित् पश्चिमायाम् उदेति । तत्र कारणं किम् ?

पिता - वत्स, चन्द्रः अपि सदा प्राच्यां दिश्येव उदेति । तथापि सः मध्याह्ने सूर्यस्य कान्त्या तिरस्कृतः आकाशे न दृश्यते । यदा सूर्यः अस्तं गच्छति तदा सः प्रकाशते। सूर्य-अस्तमनसमये चन्द्रः यत्र विद्यते तत्रैव शोभते ।

मधु - पितः ! पूर्णिमायामेव कुतः चन्द्रः पूर्णः भवति ।



unit 7.indd 40 22-03-2019 15:04:17

पिता - पूर्णिमादिने सूर्यास्तमयसमये चन्द्रः प्राच्यां दिशि उदेति। तदा सूर्यस्य सर्वे किरणाः चन्द्रबिम्बे दर्पण इव पूर्णयता पतन्ति। अतः चन्द्रः पूर्णतया प्रकाशते।

मधु - प्रतिदिनं सूर्यकिरणाः सर्वेऽपि चन्द्रे न पतन्ति किम् ?

पिता - न। भूमिः सूर्यं परितः भ्रमति। चन्द्रश्च भूमिं परितः भ्रमति। एवं भ्रमणे भूम्याः व्यवधानात् सर्वे सूर्यकिरणाः चन्द्र-उपरि एकदैव न पतन्ति । अपि तु क्रमेण अधिकतया स्वल्पतया च पतन्ति । यदा किरणानां पतनं वर्धते तदा शुक्लपक्षः इति, यदा क्षीयन्ते तदा कृष्णपक्षः इति उच्यते ।

मधु - अपूर्वोऽयं विषयः मया ज्ञातः। मम सहपाठकेभ्यः श्वः कथयिष्यामि।



सप्तविंशति ताराश्च तथा द्वादश राशयः।
नवग्रहाः नभोमार्गे भ्रमन्ति सततं स्वयम्॥

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. पाठशाला - ____________________
2. मम - ____________________
3. दिशः - ____________________
4. सूर्यः - ____________________
5. बाहुः - ____________________
6. प्राची - ____________________
7. प्रतीची - ____________________
8. दक्षिणा - ____________________



unit 7.indd 41 22-03-2019 15:04:17

9. उत्तरा - ____________________

10. तिरस्कृतः - ____________________

11. आकाशः - ____________________

12. अस्तम् - ____________________

13. बिम्बः - ____________________

14. किरणाः - ____________________

15. सर्वे - ____________________

16. भूमिः - ____________________

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. स्मरति × ____________________

2. ज्ञानम् × ____________________

3. उदयकालः × ____________________

4. अग्रे × ____________________

5. समीचीनम् × ____________________

6. कारणम् × ____________________

7. पूर्णिमा × ____________________

8. दिवा × ____________________

9. अधिकतया × ____________________

10. क्षीयते × ____________________

## III. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. मधुसूदनः पाठशालायां किम् पठितवान् ?

2. सूर्यः कुत्र उदेति ?

3. उपाध्यायः दिशां ज्ञानाय किम् अबोधयत् ?

4. चन्द्रः कुत्र उदेति ?

5. कः मध्याह्ने सूर्यस्य कान्त्या तिरस्कृतः ?

6. पूर्णिमायामेव कुतः चन्द्रः पूर्णं भवति ?

7. भूमिः कं परितः भ्रमति ?

8. कः भूमिं परितः भ्रमति ?

9. कदा शुक्लपक्षः भवति ?

10. कृष्णपक्षः कदा भवति ?

## IV. सविस्तरम् उत्तरं लिखत-

1. दिशः ज्ञानं मधुसूदनेन कथं स्पष्टीकृतम् ?

2. मधुसूदनपित्रोः संवादानुसारं चन्द्रपरिचयं कुरुत ।

*********************************

### ? पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

भूमिः दिवाकरं परितः भ्रमति । अस्याः भ्रमणेनैव एकस्मिन् वर्षे वसन्तः, ग्रीष्मः वर्षा, शरद्, हेमन्त, शिशिरश्च इति षट् ऋतवः भवन्ति ।

भारतस्य पूर्वे बंग सागरः, पश्चिमे अरबसागरः, दक्षिणे हिन्दुमहासागरः, उत्तरे हिमालयः च अस्ति ।

सूर्यस्य भ्रमणानुसारं तिथयः जायन्ते । ते प्रथमादिचतुर्दशतिथयः, पञ्चदश-तिथिस्तु अमावास्या अथवा पूर्णिमा इति कथ्यते । एवं सूर्यस्य गतिमनुसृत्य अयनमपि कथ्यते । दक्षिण- उत्तर, अयनमिति । तिथिः, वासरः, पक्षः, मासः, ऋतुः, अयनं तथा वर्ष इति कालक्रमः अस्य गत्यानुसारम् एव अनुमीयते ।।



unit 7.indd 43 22-03-2019 15:04:18

## पाठ्यातिरिक्तः व्याकरणविषयः

### उपपदविभक्तीनां प्रयोगः

विभक्तीनां विभागः द्विधा कर्तुं शक्यः । 1. कारकविभक्तिः 2. उपपदविभक्तिः । या विभक्तिः क्रियापदमनुसृत्य उपयुज्यते सा कारकविभक्तिः । या यत्र विशेषपदनिमित्तं सामान्यकारकविभक्तिं विना अन्या विभक्तिः प्रयुज्यते, तत्र सा उपपदविभक्तिः इति कथ्यते ।।

**द्वितीया – उपपदविभक्तिः**

| उपपदम् | उदाहरणम् |
|---|---|
| अभितः | अध्यापकम् अभितः छात्राः सन्ति । |
| उभयतः | नगरम् उभयतः उद्याने स्तः । |
| परितः | सूर्यं परितः ग्रहाः भ्रमन्ति । |
| सर्वतः | उपवनं सर्वतः जनाः भ्रमन्ति । |
| प्रति | कृष्णः गृहं प्रति गच्छति । |
| विना | विद्यां विना जीवनं न लभते । |
| समया / निकषा | विद्यालयं निकषा कूपः अस्ति । |
| धिक् | धिक् असत्यवादिनम् । |
| विना / ऋते | ज्ञानं विना मुक्तिः न भवति । |

**तृतीया– उपपदविभक्तिः**

| उपपदम् | उदाहरणम् |
|---|---|
| विना | परिश्रमेण विना जनः सफलतां न लभते । |
| हीनः | ज्ञानेन हीनः जनः पशुः भवति । |
| अलम् | अलं विवादेन । |
| साकम् / सह /सार्धम् | पिता पुत्रेण सह क्रिडति । |
| सदृशः | अर्जुनेन सदृशः वीरः नास्ति । |
| प्रयोजनम् | दुष्टस्य परोपकारेण किं प्रयोजनम् ? |

**चतुर्थी– उपपदविभक्तिः**

| उपपदम् | उदाहरणम् |
|---|---|
| अलम् | भारतीयसेना शत्रुदेशेभ्यः अलम् । |
| नमः | शिवाय नमः । |
| स्वाहा | इन्द्राय स्वाहा । |
| स्वस्ति | प्रजाभ्यः स्वस्ति । |
| ईर्ष्य् | दुष्टः सज्जनाय ईर्ष्यति । |



unit 7.indd 44 22-03-2019 15:04:18

Lesson 8

अष्टमः पाठः

# अस्माकं मातृभूमिः

अस्माकं मातृभूमेः भारतदेशः इति नाम । अत्र बहवः महापुरुषाः स्वजीवनेन इमं धन्यमकुर्वन् । अस्मिन् देशे विविधाः प्रदेशाः सन्ति। विशालाः पर्वताः , शीतलानि हिमशिखराणि, दीर्घाः नद्यः, मनोहराणि वनानि च सन्ति । सुजला, सुफला, शस्यश्यामला च अस्य धरा देवानामपि चित्तानि आकर्षति ।



हिमालयः अस्य मस्तकम् । असामप्रदेशः वामभुजः, पञ्चनदप्रदेशः दक्षिणः भुजः । मध्यप्रदेशः हृदयम् । काश्मीरः देशस्य मुकुटम् । समुद्रः अस्य चरणौ क्षालयति । भारतभूमिः स्वर्गादपि उत्कृष्टतरा। अयं देशः मातृसमानः। अतः इयं भारतमाता इति स्मृता ।

भारतमात्रा समः नास्ति कश्चित् प्रियः । नमः तस्य भारतमात्रे ।

अस्मिन् देशे विवधाः भाषाः विविधाः च सम्प्रदायाः सन्ति । परम् इयम् एका । सर्वे वयं अस्याः सुताः परस्परं च बान्धवः । यदि वयं सहयोगेन कार्यं करिष्यामः तदा अस्माकं सर्वेषां मङ्गलम् भवति ।

रामायणे रामः लक्ष्मणं प्रति मातृभूमेः महत्वं एवं प्रतिपादयति –

- अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
  जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।। इति ।



unit 8.indd 45 22-03-2019 15:05:05

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. देशः - ____________________
2. पर्वतः - ____________________
3. नद्यः - ____________________
4. वनानि - ____________________
5. भुजः - ____________________
6. हृदयम् - ____________________
7. चरणः - ____________________
8. समुद्रः - ____________________
9. सुता - ____________________
10. बान्धवः - ____________________

### II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. विशाला × ____________________
2. दीर्घः × ____________________
3. अस्ति × ____________________
4. प्रियः × ____________________
5. एका × ____________________
6. वयम् × ____________________
7. कार्यम् × ____________________
8. परः × ____________________
9. दक्षिणः × ____________________
10. जीवनम् × ____________________



unit 8.indd 46 22-03-2019 15:05:05

## III. पाठात् समुचितम् पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. अस्माकं ________ भारतदेशः इति नाम ।
2. हिमालयः अस्य देशस्य ________ ।
3. ________ वामभुजः ।
4. पञ्चनदप्रदेशः ________ ।
5. समुद्रः अस्य चरणौ ________ ।

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. अस्माकं मातृभूमेः नाम किम् ?
2. भारतस्य मस्तकं किम् ?
3. कः प्रदेशः भारतस्य वामभुजः भवति ?
4. पञ्चनदप्रदेशः भारतस्य कः भुजः ?
5. भारतस्य हृदयप्रदेशः कः ?
6. काश्मीरदेशः कथं भवति ?
7. कः देशस्य चरणौ क्षालयति ?
8. भारतभूमिः कस्मात् उत्कृष्टतरा भवति ?
9. सर्वे वयं कस्याः सुताः परस्परं बान्धवः च ?
10. सहयोगेन कार्यं क्रियते चेत् वयं किं प्राप्नुमः ?

## V. सविस्तरम् उत्तरं लिखत-

1. भारतस्य अवयवाः के ?
2. भारतस्य महत्वं यथाग्रन्थं विवृणुत ।।

*********************************



unit 8.indd 47 22-03-2019 15:05:05

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

- उत्तरं यत्समुद्रस्य

  हिमाद्रेश्चैव दक्षिणम् ।

  वर्षं तद्भारतं नाम

  भारती यत्र सन्ततिः ।।

- गायन्ति देवाः किल गीतकानि

  धन्यास्तु ते भारतभूमिभागे ।

  स्वर्गापवर्गास्पदमार्गभूते

  भवन्ति भूयः पुरुषाः सुरत्वात् ।।

- माता भूमिः पुत्रो अहं पृथिव्याः

- त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं

  बिभर्षि द्विपदस्त्वं चतुष्पदः ।

  तवेमे पृथिवी पञ्च मानवा येभ्यो

  ज्योतिरमृतं मर्त्येभ्य उद्यन्सूर्यो रश्मिभिरातनोति ।

- अस्त्युत्तरस्यां दिशि देवतात्मा

  हिमालयो नाम नगाधिराजः।

  पूर्वापरौ तोयनिधीवगाह्य

  स्थितः पृथिव्या इव मानदण्डः ।।



unit 8.indd 48 22-03-2019 15:05:06

## व्याकरण-अभ्यासः - 4

### धातुः – परस्मैपदी - लङ् (Past Tense)

वद् – to speak

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवदत् | अवदताम् | अवदन् |
| मध्यमपुरुषः | अवदः | अवदतम् | अवदत |
| उत्तमपुरुषः | अवदम् | अवदाव | अवदाम |

पत् – to fall

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपतत् | अपतताम् | अपतन् |
| मध्यमपुरुषः | अपतः | अपततम् | अपतत |
| उत्तमपुरुषः | अपतम् | अपताव | अपताम |

भू – (भव्) – to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुषः | अभवः | अभवतम् | अभवत |
| उत्तमपुरुषः | अभवम् | अभवाव | अभवाम |



unit 8.indd 49 22-03-2019 15:05:06

Lesson 9 नवमः पाठः

# दिलीपवर्णनम्

अयं पाठ्यभागः महाकविकालिदासेन विरचितात् रघुवंशमिति महाकाव्यात् स्वीकृतः। अत्र सूर्यवंशोत्पन्नानां राज्ञां चरितं वर्णितमस्ति। अस्मिन् पाठ्यभागे राज्ञः दिलीपस्य गुणाः वर्णिताः विद्यन्ते। एतेन राज्ञा कथं देशपालनं कर्तव्यमिति अवगम्यते।



वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवच्छन्दसामिव ।। 1

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुः इन्दुः क्षीरनिधाविव ।। 2

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भः आरंम्भसदृशोदयः ।। 3



unit 9.indd 50 22-03-2019 15:05:59

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुम् आदत्ते हि रसं रविः ।। 4

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव ।। 5

अनाकृष्टस्य विषयैः विद्यानं पारदृश्वनः ।
तस्य धर्मरतेरासीत् वृद्धत्वं जरसा विना ।। 6

प्रजानां विनयाधानात् रक्षणात् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ।। 7

स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ।। 8

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. माननीयः - ____________________
2. महीक्षिताम् - ____________________
3. छन्दसाम् - ____________________
4. इन्दुः - ____________________
5. क्षीरनिधौ - ____________________
6. आगमः - ____________________
7. बलिम् - ____________________
8. रविः - ____________________
9. क्षमा - ____________________
10. श्लाघा - ____________________



unit 9.indd 51 22-03-2019 15:05:59

11. जरसा - ____________

12. हेतवः - ____________

13. वप्रवलयां - ____________

14. सागराम् - ____________

15. उर्वीम् - ____________

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. आद्यः × ____________
2. सदृशः × ____________
3. आरम्भः × ____________
4. उत्स्रष्टुम् × ____________
5. क्षमा × ____________
6. विपर्ययः × ____________
7. अनाकृष्टस्य × ____________
8. वृद्धत्वम् × ____________
9. रक्षणात् × ____________
10. अनन्यशासनाम् × ____________

## III. सन्धिं कुरुत-

1. प्रणवः + छन्दसामिव = ____________
2. क्षीरनिधौ + इव = ____________
3. सदृश + उदयः = ____________
4. धर्मरतेः + आसीत् = ____________
5. पितरः + तासाम् = ____________

## IV. विभजत-

1. मनुर्नाम - ________ + ________
2. राजेन्दुः - ________ + ________
3. सदृशागमः - ________ + ________
4. गुणानुबन्धित्वात् - ________ + ________
5. शशासैकपुरीमिव - ________ + ________

## V. अधोलिखितानां प्रश्नानाम् उत्तरं लिखत-

1. महीक्षिताम् आद्यः कः आसीत् ?
2. राजेन्दुः कः ?
3. दिलीपः प्रज्ञया किं प्राप्तवान् ?
4. दिलीपः किमर्थं बलिम् अग्रहीत् ?
5. रविः किम् आदत्ते ?
6. दिलीपस्य गुणाः कीदृशा इव आसन् ?
7. "वृद्धत्वं जरसा विना" – कथम् ?
8. "स पिता पितरस्तासाम्" – विवृणुत ।
9. दिलीपः कीदृशीम् उर्वीम् शशास ?
10. दिलीपः उर्वीं कथं शशाम ?

## VI. सविस्तरम् उत्तरं लिखत-

1. यथाग्रन्थं दिलीपवर्णनं पञ्च श्लोकैः विवृणुत ।

**********************************



unit 9.indd 53 22-03-2019 15:05:59

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

सः राज्यं रविणा दत्तं
प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः
सवित्रेव हुताशनः ।। 1

दिलीपानन्तरं राज्ये
ते निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां
हृदयेऽग्निरिवोत्थितः ।। 2

सममेव समाक्रान्तं
द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यम्
अखिलं चारिमण्डलम् ।। 3

मनुप्रभृतिभिर्मान्यैः
भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव
तस्मिन्नासीद्वसुन्धरा ।। 4

स हि सर्वस्य लोकस्य
युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो
नभस्वानिव दक्षिणः ।। 5



unit 9.indd 54 22-03-2019 15:06:00

पञ्चानामपि भूतानाम्

उत्कर्षं पुपुषुर्गुणाः ।

नवे तस्मिन् महीपाले

सर्वं नवमिवाभवत् ।। 6

कामं कर्णान्तविश्रान्ते

विशाले तस्य लोचने ।

चक्षुष्मत्ता तु शास्त्रेण

सूक्ष्मकार्यार्थदर्शिना ।। 7

स गुप्तमूलप्रत्यन्तः

शुद्धपार्ष्णिरयान्वितः ।

षट्विधं बलमादाय

प्रतस्थे दिग्जिगीषया ।। 8

## पाठ्यातिरिक्तः व्याकरणविषयः

### सन्धिपरिचयः

सन्धिः

- अच्सन्धिः (स्वरसन्धिः)
- हल्सन्धिः (व्यञ्जनसन्धिः)
- प्रकृतिभावसन्धिः
- विसर्गसन्धिः
- स्वादिसन्धिः

### अच्सन्धिः (स्वरसन्धिः)

1. सवर्णदीर्घसन्धिः – अकः सवर्णे अकि परे पूर्वपरयोः स्थाने दीर्घः एकादेशः स्यात् ।
   यथा - राम + आलयः = रामालयः

2. गुणसन्धिः – अवर्णात् इकि परे पूर्वपरयोः स्थाने एको गुणः आदेशः स्यात् ।
   यथा – वद + इति = वदेति



unit 9.indd 55 22-03-2019 15:06:00

| | | | |
|---|---|---|---|
| 3. | वृद्धिसन्धिः | – | अवर्णात् एचि परे पूर्वपरयोः स्थाने वृद्धिः एकादेशः स्यात् ।<br>यथा – रमा + एव = रमैव । |
| 4. | यणादेशसन्धिः | – | असवर्णे अचि परे इकः स्थाने यणः स्युः।<br>यथा – दधि + अत्र = दध्यत्र । |
| 5. | अयायादेशसन्धिः | – | एकारस्य ऐकारस्य च क्रमात् अय्, आय् आदेशौ स्यातां अचि परे ।<br>यथा – हरे + ए = हरये । |
| 6. | अवावादेशसन्धिः | – | ओकारस्य औकारस्य च स्थाने अव् आव् आदेशौ क्रमेण स्याताम् अचि परे ।<br>यथा – विष्णो + ए = विष्णवे । |
| 7. | पूर्वरूपसन्धिः | – | पदान्तात् एङः ह्रस्वाकारे परे पूर्वरूपम् एकादेशः स्यात् ।<br>यथा – हरे + अव = हरेऽव । |
| 8. | पररूपसन्धिः | – | अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पररूपं नित्यं स्यात् ।<br>यथा - प्र + एजते = प्रेजते |
| 9. | अवङादेशसन्धिः | – | पदान्ते गोशब्दस्य अचि परे अवङादेशो वा भवति ।<br>यथा- गो + अग्रम् = गवाग्रम् / गोऽग्रम् । |

## प्रकृतिभावसन्धिः

1. पदान्ताः इकः असवर्णे अचि परे प्रकृत्या स्युः ह्रस्वश्च वा भवति –

यथा – चक्री + अत्र = चक्री अत्र / चक्र्यत्र ।



unit 9.indd 56 22-03-2019 15:06:00

Lesson **10** दशमः पाठः

# सत्यमेव जयते

सत्येन धार्यते पृथ्वी, सत्येन तपते रविः ।
सत्येन वायवो वान्ति, सर्वं सत्ये प्रतिष्ठितम् ।।

लोके मनुष्याः मनुष्यत्वं प्राप्तुं धर्माचरणं कुर्यात् । धर्माचरणैनैव पुमान् पूर्णः भविष्यति। तत्र प्रथमं सत्यस्य पालनं कुर्यात् । सत्यं नष्टं चेत् कोऽपि अन्यः धर्मः स्थातुं न शक्यः । अतः अस्मिन् पाठ्यभागे सत्यस्य महत्वज्ञानाय कथा प्रदत्ता विद्यते ।

एकस्मिन् ग्रामे कश्चन चोरः आसीत् । सः प्रातः द्यूतं, रात्रौ चौर्यं च अकरोत् । कदाचित् तस्मिन् ग्रामे कश्चन मुनिः आगच्छत् । एकस्मिन् दिने सः मुनिः जनान् सदुपदेशम् अकरोत् । तच्छ्रुत्वा चोरः जनगमनानन्तरं तस्य समीपम् अगच्छत्। सः तस्य शिष्यं भवितुम् ऐच्छत् । तदा मुनिः तस्य कर्म ज्ञात्वा तं दुष्कर्म त्यक्तुं सत्यं वक्तुं च आदिशत् । सोऽपि इतः परं सर्वदा सत्यं भणामि इति प्रतिज्ञाम् अकरोत् । मुनिः ग्रामान्तरम् अगच्छत् ।



एकदा सः चोरः रात्रौ चौर्यार्थं राजभवनम् अगच्छत् । तदा वेषान्तरधारी राजा कमपि शब्दं शृण्वन् कस्तत्र? इति अपृच्छत् । सोऽपि "अहं चोरः" इत्यवोचत् । तस्य उत्तरेण विस्मितः राजा तस्य समीपं गत्वा अहमपि चोरः एव इत्यवोचत् । अपि च कस्मिन् प्रकोष्ठे आभरणानि सन्ति इति अहं जानामि । अतः त्वम् इमां कुञ्चिकां स्वीकृत्य गच्छ इति अवदत् । तदा "चौर्यकर्मणा यल्लभ्यते, तत् समभागेन विभज्य स्वीकुर्याताम्" इति प्रतिज्ञाम् अकुरुताम् ।

ततः चोरः राजभवने कोशागारं गत्वा सर्वाणि आभरणानि अपश्यत् । सः वज्रत्रयघटितां पेटिकाम् उत्पाट्य नियमानुसारं वज्रद्वयमेव स्वीकृत्य आगतवान् । राज्ञे एकं दत्वा, अन्यदेकं स्वीकृत्य स्वविलासं च दत्वा अगच्छत् ।



unit 10.indd 57 22-03-2019 15:07:12

परेद्युः चोरितविषयः राजसभां गतः । तदा राजा मन्त्रिणमाहूय किं वस्तु चोरितम् इति द्रष्टुम् आदिशत् । मन्त्री कोशागारं गत्वा अवशिष्टं वज्रं स्वाङ्के निगूह्य आगच्छत् । सः राज्ञः सविधे "वज्रपेटिका शून्यवाटिका कृता" इत्यवोचत् ।



राजा भटान् आहूय विलासं दत्वा चोरम् आनयत्। चोरोऽपि सर्वं वृत्तान्तम् अकथयत् । मन्त्रिणः उपरि शङ्कितः राजा तं परीक्षितुम् आदिशत् । तदा अपहृतं वज्रं बहिरागतम् । राजा मन्त्रिणं कारागृहे निवेश्य, चोरं मन्त्रिपदव्याम् अयोजयत् ।



कालान्तरे तद्राज्यं समायातेन मुनिना विषयोऽयं श्रुतः । शिष्यं बहुधा प्रशंस्य "सत्यस्य फलमिदम्" इति अवोचत् ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. चोरः - ____________
2. द्यूतम् - ____________
3. समीपम् - ____________
4. आदिशत् - ____________
5. भणामि - ____________
6. विस्मितः - ____________
7. प्रकोष्ठे - ____________
8. कुञ्चिकाम् - ____________



unit 10.indd 58 22-03-2019 15:07:13

9. प्रतिज्ञाम् - ____________________

10. कोशागारम् - ____________________

11. वज्रम् - ____________________

12. पेटिकाम् - ____________________

13. उत्पाट्य - ____________________

14. स्वाङ्के - ____________________

15. विलासम् - ____________________

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. प्रातः × ____________________

2. समीपम् × ____________________

3. दुष्कर्म × ____________________

4. विस्मितः × ____________________

5. राजा × ____________________

6. विभज्य × ____________________

7. उत्पाट्य × ____________________

8. एकम् × ____________________

9. निगूह्य × ____________________

10. उपरि × ____________________

## III. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. चोरः प्रातः रात्रौ च किम् अकरोत् ?

2. चोरः कस्य शिष्यं भवितुम् ऐच्छत् ?

3. मुनिः चोरं किम् आदिशत् ?

4. चोरस्य प्रतिज्ञा का ?



unit 10.indd 59 22-03-2019 15:07:13

5. वेषान्तरधारी कः ?

6. चोरः कोशागारे काम् उत्पाटितवान् ?

7. चोरः वज्रमेकं कस्मै दत्तवान् ?

8. मन्त्री कोशागारं गत्वा किम् अकरोत् ?

9. राजा कं परीक्षितुम् आदिशत् ?

10. राजा चोरं कस्याम् अयोजयत् ?

## IV. सविस्तरम् उत्तरं लिखत-

1. 'सत्यमेव जयते' इति कथां संक्षिप्य लिखत ।

## V. वाक्येषु योजत –

1. कश्चन ______________________________

2. सर्वदा ______________________________

3. अपि ______________________________

4. इति ______________________________

5. गत्वा ______________________________

**********************************



unit 10.indd 60 22-03-2019 15:07:13

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### महाभारते -

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।

अश्वमेधसहस्राद् हि सत्यमेव विशिष्यते ।।

धर्मस्य मूलं सत्यम् । सत्यमेव धर्मः ।

नहि धर्मः सत्यात् अतिरिच्यते ।

सत्यं ज्योतिः सत्यमेव जीवनं द्योतयति ज्वलयति च ।

सत्यं ब्रह्मणः तत्वम् ।

- सत्यपालनार्थमेव महाराजः दशरथः निजं प्रियं पुत्रं रामं वनं प्रैषयत् ।
- राजा हरिश्चन्द्रः, युधिष्ठिरः महात्मागान्धीप्रभृतयः सत्यसंरक्षणार्थमेव स्वजीवनानि समर्पयामासुः ।
- भारतस्य राजचिह्नेऽपि 'सत्यमेव जयते' इति सादरम् उल्लिख्यते ।
- सत्यमेव जयते नानृतं सत्यस्य पन्था विततो देवयानः ।
- येनाऽऽक्रमन्त्यृषयो ह्याप्तकामा यत्र तत् सत्यस्य परं निधानम् ।
- यथार्थकथनं यच्च सर्वलोकसुखप्रदम् ।

  तत्सत्यमिति विज्ञेयमसत्यं तद्विपर्ययः ।।
- अहिंसा सत्यवचनं सर्वभूतहितं परम् ।

  यद् भूतहितमत्यन्तं तत् सत्यमिति धारणा ।।



unit 10.indd 61 22-03-2019 15:07:14

## व्याकरण-अभ्यासः - 5

### अजन्तनपुंसकलिङ्गशब्दाः

### इकारान्तः नपुंसकलिङ्गः "वारि" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्यां | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्यां | वारिभिः |
| पञ्चमी | वारिणः | वारिभ्यां | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |
| सम्बोधन-प्रथमा | हे वारे ! / हे वारि ! | हे वारिणी ! | हे वारीणि ! |

### इकारान्तः नपुंसकलिङ्गः "दधि" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | दधि | दधिनी | दधीनि |
| द्वितीया | दधि | दधिनी | दधीनि |
| तृतीया | दध्ना | दधिभ्यां | दधिभिः |
| चतुर्थी | दध्ने | दधिभ्यां | दधिभ्यः |
| पञ्चमी | दध्नः | दधिभ्यां | दधिभ्यः |
| षष्ठी | दध्नः | दध्नोः | दध्नाम् |
| सप्तमी | दध्नि – दधनि | दध्नोः | दधिषु |
| सम्बोधन-प्रथमा | हे दधे ! – हे दधि ! | हे दधिनी ! | हे दधीनि ! |



unit 10.indd 62 22-03-2019 15:07:14

## इकारान्तः नपुंसकलिङ्गः "शुचि" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमा | शुचि | शुचिनी | शुचीनि |
| द्वितीया | शुचि | शुचिनी | शुचीनि |
| तृतीया | शुचिना | शुचिभ्यां | शुचिभिः |
| चतुर्थी | शुचिने – शुचये | शुचिभ्यां | शुचिभ्यः |
| पञ्चमी | शुचिनः - शुचेः | शुचिभ्यां | शुचिभ्यः |
| षष्ठी | शुचिनः – शुचेः | शुचिनोः - शुच्योः | शुचीनाम् |
| सप्तमी | शुचिनि – शुचौ | शुचिनोः - शुच्योः | शुचिषु |
| सम्बोधन-प्रथमा | हे शुचे ! – हे शुचि ! | हे शुचिनी ! | हे शुचीनि ! |

## इकारान्तः नपुंसकलिङ्गः "अस्थि" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमा | अस्थि | अस्थिनी | अस्थीनि |
| द्वितीया | अस्थि | अस्थिनी | अस्थीनि |
| तृतीया | अस्थिना | अस्थिभ्यां | अस्थिभिः |
| चतुर्थी | अस्थिने | अस्थिभ्यां | अस्थिभ्यः |
| पञ्चमी | अस्थिनः | अस्थिभ्यां | अस्थिभ्यः |
| षष्ठी | अस्थिनः | अस्थिनोः | अस्थीनाम् |
| सप्तमी | अस्थिनि | अस्थिनोः | अस्थिषु |
| सम्बोधन-प्रथमा | हे अस्थि ! | हे अस्थिनी ! | हे अस्थीनि ! |



unit 10.indd 63 22-03-2019 15:07:14

Lesson **11** एकादशः पाठः

# पर्णविज्ञानम्

विश्वेऽस्मिन् मनुष्याः सर्वदा रोगरहिताः सन्तः सुखमयं जीवनं कर्तुं वाञ्छन्ति। रोगनिवारणाय तत्र तत्र वैद्यान् दृष्ट्वा चिकित्सां च प्राप्नुवन्ति । तत्र ते वैद्याः प्रकृतितः उत्पन्नानां वृक्षस्य पर्णानाम् उपयोगेन चिकित्सां ददति । अतः अस्मिन् पाठ्यभागे विविधानां पर्णानां वैशिष्ट्यं वर्णितम् अस्ति ।

बिल्वपत्रम् -



बिल्वस्तु मधुरो हृद्यः
कषायः पित्तजिदगुरुः ।
कफज्वरातिसारघ्नः
रुचिकृद्दीपनः परः ।।

दूर्वायुग्मम् -



दूर्वा शीता कषाया च
रक्तपित्तकफापहा ।
अनुपत्रा कषाया च
शीतला श्लेष्मवातला ।।



unit 11.indd 64 22-03-2019 15:08:01

तुलसीपत्रम् -

तुलसी कटुतिक्तोष्णा
तुलसी श्लेष्मवातजित् ।
जन्तुभूतक्रिमिहरा
रुचिकृद्वातशान्तिकृत् ।



चूतपत्रम् -

हृद्यं वर्ण्यकरं रुच्यं
रक्तमांसबलप्रदम् ।
कषायानुरसं स्वादु
वातघ्नं बृंहणं रवि ।।



जातीपत्रम् -

मालतीकफपित्तास्यरुक्
पाकव्रणकुष्ठजित् ।
चक्षुष्यो मुकुलस्तस्याः
तत्पुष्पं कफवातजित् ।।





unit 11.indd 65 22-03-2019 15:08:03

अश्वत्थम् -

पिप्पलाः सुमधुरस्तु कषायः
शीतलश्च कफपित्तविनाशी ।
रक्तदाहशमनः हि सद्यो
योनिदोषहरणः किल पक्वः ।।



दाडिमीपत्रम् -

दाडिमं मधुरमम्लकषायं
कासवातकफपित्तविनाशि ।
ग्राहि दीपनकरं च लघूष्णं
शीतलं श्रमहरं रुचिदायि ।।



अर्कपत्रम् -

अर्कस्तिक्तो भवेदुष्णः
शोधनः परमः स्मृतः ।
कण्डूव्रणहरो हन्ति
जन्तुसन्ततिमुद्धताम् ।।





unit 11.indd 66 22-03-2019 15:08:04

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. कषायः - ____________________
2. कफम् - ____________________
3. शीतम् - ____________________
4. रक्तम् - ____________________
5. कटु - ____________________
6. वातः - ____________________
7. मांसम् - ____________________
8. बलप्रदम् - ____________________
9. व्रणः - ____________________
10. चित्तम् - ____________________
11. कासः - ____________________
12. अम्लः - ____________________
13. चक्षुः - ____________________
14. हन्ति - ____________________
15. उष्णः - ____________________

### II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. मधुरः × ____________________
2. गुरुः × ____________________
3. रुचिः × ____________________
4. परः × ____________________
5. शीतम् × ____________________



unit 11.indd 67 22-03-2019 15:08:04

6. बलम् × ______________________

7. दोषः × ______________________

## III. सन्धिच्छेदं कुरुत-

1. बिल्वस्तु - _______ + ________
2. पित्तजिदगुरुः - _______ + ________
3. रुचिकृद्दीपनः - _______ + ________
4. तिक्तोष्णा - _______ + ________
5. कषायानुरसम् - _______ + ________

## IV. सन्धिं कुरुत-

1. रुचिकृत् + वातशान्तिकम् = __________
2. शीतलः + च = __________
3. मधुरम् + अम्ल = __________
4. भवेत् + उष्णः = __________
5. जन्तुसन्ततिम् + उद्धताम् = __________

## V. श्लोकं पूरयत-

1. बिल्वस्तु मधुरो हृद्यः _______ _______।

   कफज्वरातिरारघ्नः _______ _______ ।।

2. _______ _______ तुलसी श्लेष्मवातजित् ।

   जन्तुभूतक्रिमिहरा _______ _______ ।।

3. मालतीकफपित्तांस्यरुक् पाकव्रणकुष्ठजित् ।

   _______ _______ _______ ।।

4. _______ _______ कासवातकफपित्तविनाशि ।

   _______ _______ शीतलं श्रमहरं रुचिदायि ।।



unit 11.indd 68 22-03-2019 15:08:04

## VI. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. बिल्वपत्रेण के रोगाः शाम्यन्ते ?
2. दूर्वायुग्मस्य लक्षणं लिखत ।
3. तुलसीपत्रस्य रसभेदं विवृणुत ।
4. चूतपत्रद्वारा के रोगाः निवार्यन्ते ?
5. जातीपत्रस्वीकरणेन किं प्रयोजनम् ?
6. अश्वत्थपत्रेण नश्यमानाः आमयाः के ?
7. दाडिमीपत्रस्य रसभेदाः के ?
8. अर्कपत्रस्य प्रयोजनं लिखत ।

## VII. सविस्तरम् उत्तरं लिखत-

| | | | |
|---|---|---|---|
| 1. विवरणं कुरु | - | 1. अर्कपत्रम् | 2. अश्वत्थम् |
| 2. विशदयत | - | 1. जातीपत्रम् | 2. बिल्वपत्रम् |
| 3. टिप्पणीं लिखत | - | 1. तुलसी | 2. दाडिमीपत्रम् |
| 4. यथाग्रन्थं वर्णयत | - | 1. चूतपत्रम् | 2. दूर्वायुग्मम् |

**********************************



unit 11.indd 69 22-03-2019 15:08:04

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

- यद्यपि चन्दनविटपी विधिना फलकुसुमविवर्जितो विहितः ।
  निजवपुषैव परेषां तथापि संतापमपहरति ।।
- मूलं भुजङ्गैः शिखरं प्लवंगैः शाखा विहंगैः कुसुमानि भृङ्गैः ।
  नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्वभरैः समन्तात् ।।

### तुलसी महिमा -

- पापानि यानि रविसूनुपटस्थितानि
  गोब्रह्नबालपितृमातृवधादिकानि ।
  नश्यन्ति तानि तुलसीवनदर्शनेन
  गोकोटिदानसदृशं फलमाप्नुवन्ति ।।
- त्यजेत्पर्युषितं पुष्पं त्यजेत्पर्युषितं जलम् ।
  न त्यजेत्तुलसीपत्रं न त्यजेज्जाह्नवीजलम् ।।
- पुष्करादृयानि तीर्थानि गङ्गाद्याः सरितस्तथा ।
  वासुदेवादयो देवाः वसन्ति तुलसीवने ।।
- आम्रारोपसहस्राणि पिप्पलानि शतानि च ।
  तत्फलं सममेकेन तुलसी विटपेन च ।।
- द्रव्यान्तरयुतं तैलं न दुष्येद् ग्रहणं विना ।
  तुलसीदलसंयुक्तं ग्रहणेऽपि न दुष्यति ।।
- चतुष्कर्णे मुखे चैकं नाभावेकं तथैव च ।
  शिरस्येकं तथा प्रोक्तं तीर्थे त्रयमुदाहृतम् ।।
- अन्नोपरि तथा पञ्च भोजनान्ते दलत्रयम् ।
  एवं श्रीतुलसी ग्राह्या अष्टादशदला सदा ।।



unit 11.indd 70 22-03-2019 15:08:04

## पाठ्यातिरिक्तः व्याकरणविषयः

### समासः

अनेकपदानां एकपदत्वव्यवहारः यत्र भवति, सः समासः । सः संक्षेपतः षोढा भवति ।

| | समासः | तद्भेदाः |
|---|---|---|
| 1. | तत्पुरुषसमासः | 8 |
| 2. | कर्मधारयसमासः | 7 |
| 3. | द्विगुसमासः | 2 |
| 4. | बहुव्रीहिसमासः | 7 |
| 5. | अव्ययीभावसमासः | 2 |
| 6. | द्वन्द्वसमासः | 4 |

**तत्पुरुषसमासः (उत्तरपदार्थः मुख्यः)**

| | | | |
|---|---|---|---|
| 1. | प्रथमातत्पुरुषः | - | पूर्वः कायस्य = पूर्वकायः । |
| 2. | द्वितीयातत्पुरुषः | - | कृष्णं श्रितः = कृष्णश्रितः । |
| 3. | तृतीयातत्पुरुषः | - | मासेन पूर्वः = मासपूर्वः । |
| 4. | चतुर्थीतत्पुरुषः | - | यूपाय दारु = यूपदारु । |
| 5. | पञ्चमीतत्पुरुषः | - | चोरात् भयम् = चोरभयम् । |
| 6. | षष्ठीतत्पुरुषः | - | राज्ञः पुरुषः = राजपुरुषः । |
| 7. | नञ् तत्पुषः | - | न ज्ञानं = अज्ञानम् । |

**कर्मधारयसमासः (उत्तरपदार्थप्रधानः)**

| | | | |
|---|---|---|---|
| 1. | विशेषणपूर्वपदकर्मधारयः | - | नीलानि च तानि उत्पलानि = नीलोत्पलानि। |
| 2. | विशेष्यपूर्वपदकर्मधारयः | - | व्यंसकाश्च ते मयूराश्च = मयूरव्यंसकाः । |
| 3. | विशेषणोभयपदकर्मधारयः | - | भोज्यं च तत् उष्णं च = भोज्योष्णम् । |
| 4. | उपमानोत्तरपदकर्मधारयः | - | पुरुषो व्याघ्र इव = पुरुषव्याघ्रः । |
| 5. | उपमानपूर्वपदकर्मधारयः | - | द्राक्षा इव मधुरा = द्राक्षामधुरा । |
| 6. | सम्भावनापूर्वपदकर्मधारयः | - | तमाल इति वृक्षः = तमालवृक्षः । |
| 7. | अवधारणापूर्वपदकर्मधारयः | - | कविः एव सागरः = कविसागरः । |



unit 11.indd 71 22-03-2019 15:08:04

Lesson 12 द्वादशः पाठः

# गुरुभक्तिः

विद्या विनयसाधनम् इत्युच्यते । विनयेन सहिता विद्या श्रेष्ठा भवति । यः छात्रः सविनयं गुरुं सेवते सः लोके प्रतिभायुक्तः सन् सर्वविधं कौशलं प्राप्नोति इति दृढः विश्वासः । अस्मिन् पाठ्यभागे गुरोः सेवा शिष्येण कथं करणीया इति कथामाध्यमेन उच्यते ।



आसीत् धौम्यो नाम कश्चित् ऋषिः । तस्य बहवः शिष्याः आसन् । तेषु आरुणिः इति कश्चन शिष्यः सौम्यः, विनम्रः, सलरहृदयश्च आसीत् । सः सर्वदा गुरोः आज्ञां पालयति स्म ।

एकदा गुरुः अध्यापने व्यस्तः अभवत् । तदा नभः मेघैः आच्छादितम् अभवत् । तदा गुरुः आरुणिम् एवम् आदिशत् - "वत्स! त्वं शीघ्रं गत्वा जलप्रवाहं बहिः गमनात् अवरोधय" इति ।

आरुणिः गुरोः आज्ञां स्वीकृत्य अगच्छत् । तत्र भग्नं मृत्तिकाबन्धं पुनः दृढं कर्तुं प्रयत्नम् अकरोत्। परं तद्बन्धुं नाशक्नोत् । तदा सः उपायम् अचिन्तयत् । गुरोः आज्ञा कथं सफला भवेत् इति विचार्य स्वशरीरमेव बन्धस्थाने अस्थापयत् । शयाने च तथा तस्मिन् उदकं तस्थौ । दिवसो रजन्यां परिवर्तितः।



unit 12.indd 72 22-03-2019 15:09:08

रात्रौ धौम्यः आरुणिम् अदृष्ट्वा शिष्यान् अपृच्छत् – आरुणिः कुत्रास्ति ? इति। ते तं प्रत्यवोचन्- भगवन् ! भवान् एव तं क्षेत्रे जलम् अवरोद्धुं प्रैषयत् इति ।

तच्छ्रुत्वा धौम्यः तस्य विषये अतीव चिन्तितः अभवत्। सः शीघ्रं शिष्यैः सह क्षेत्रं प्रति अगच्छत्। तत्र गुरुः उच्चस्वरेण आह्वयति स्म – "वत्स! आरुणे ! कुत्रासि ? इति । तदा क्षीणस्वरेण आरुणिः अवदत् -" गुरो! अहम् अत्र अस्मि इति ।

मृत्तिकालिप्तदेहस्य निजप्रियशिष्यस्य गुरुभक्तिं दृष्ट्वा धौम्यः अतीव प्रसन्नः अभवत्। तेन गुरुः तस्मै आशीर्वादम् अकरोत् । यस्मात् मृत्तिकाबन्धं विदार्य उत्थितः तस्मात् 'उद्दालक' एव नाम्ना त्वं भविष्यसि इत्यवोचत्। श्रेयः अवाप्स्यसि, विद्वान् च भविष्यसि इति अनुगृहीतवान्। आरुणिः अपि विद्वान् भूत्वा संसारे प्रसिद्धः अभवत् ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. ऋषिः - ____________________
2. शिष्याः - ____________________
3. आज्ञाम् - ____________________
4. व्यस्तः - ____________________
5. नभः - ____________________
6. प्रवाहम् - ____________________
7. मृत्तिका - ____________________
8. उपायम् - ____________________
9. विचार्य - ____________________
10. शयाने - ____________________
11. उदकम् - ____________________
12. प्रैषयत् - ____________________
13. क्षेत्रम् - ____________________



unit 12.indd 73 22-03-2019 15:09:09

14. क्षीणस्वरेण - ____________________

15. विदार्य - ____________________

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. बहवः × ____________________
2. सौम्यः × ____________________
3. व्यस्तः × ____________________
4. शीघ्रम् × ____________________
5. स्वीकृत्य × ____________________
6. रात्रौ × ____________________
7. अदृष्ट्वा × ____________________
8. उच्चस्वरेण × ____________________
9. प्रसन्नः × ____________________
10. उत्थितः × ____________________

## III. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. कस्य शिष्यः आरुणिः ?
2. आरुणिः कीदृशः आसीत् ?
3. गुरुः आरुणिं किमादिशत् ?
4. आरुणिः गुरोः आज्ञां स्वीकृत्य किम् अकरोत् ?
5. गुरोः आज्ञां सफलीकर्तुं आरुणिः किम् अकरोत् ?
6. धौम्यः किं दृष्ट्वा अतीव प्रसन्नः अभवत् ?
7. आरुणिः कस्य नाम्ना भविष्यति इति गुरुः अवोचत् ?
8. धौम्यः आरुणिं किम् अनुगृहीतवान् ?



unit 12.indd 74 22-03-2019 15:09:09

## IV. सविस्तरम् उत्तरं लिखत-

1. आरुणेः गुरुभक्तिं वर्णयत।

## V. पाठात् समुचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. आसीत् ________ नाम कश्चित् ऋषिः।
2. सः सर्वदा ________ आज्ञां पालयति स्म।
3. त्वं शीघ्रं गत्वा ________ बहिः गमनात् अवरोधय ।
4. शयाने च तथा तस्मिन् ________ तस्थौ।
5. यस्मात् मृत्तिकाबन्धं विदार्य उत्थितः तस्मात् ________ एव नाम्ना त्वं भविष्यसि ।

*********************************

### पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

यः हि आचारं ग्राह्यति, छात्रोपयोगि विषयान् संगृह्णाति, छात्रबुद्धिं विकासयति च सः आचार्यः इति कथ्यते ।

यः सदाचार – शिक्षणपूर्वकं छात्रेषु जितेन्द्रियत्वं पोषयति सः आचार्यः । आचार्य–शिष्ययोः पितापुत्रवत् सम्बन्धः आस्थीयते । उपनयन-संस्कारेण शिष्यस्य गुरोः समीपनिवासाद् अन्तेवासित्वं संजायते। परीक्षणकाले गुरुसविधे रात्रित्रयावस्थानेनाचार्यस्य मातृत्वं निर्दिश्यते । एवं रविप्रदत्तज्ञानावाप्ततेजस्वित्वं च छात्रे संलक्ष्यते ।

आचार्यनिरीक्षणेऽधीयानः अन्तेवासी सामान्यवेषं मेखलादिकं च धारयन् घोरेण परिश्रमेण तपोमयजीवनेन च लोकत्रयं पुष्णाति।

गुरोः देवत्वं कस्य न विदितम् । गुरुः एव अज्ञानान्धतमं व्यवच्छिद्य ज्ञान-ज्योतिर्ज्वलयति। तत्कृपयैव दिव्यदृष्टित्वं प्राप्यते । अत एव उच्यते -

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।। इति।



unit 12.indd 75 22-03-2019 15:09:09

## व्याकरण-अभ्यासः – 6

### धातुः – परस्मैपदी - लङ् (Past Tense)

#### क्रीड् – to play

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अक्रीडत् | अक्रीडताम् | अक्रीडन् |
| मध्यमपुरुषः | अक्रीडः | अक्रीडतम् | अक्रीडत |
| उत्तमपुरुषः | अक्रीडम् | अक्रीडाव | अक्रीडाम |

#### पा(पिब्) – to drink

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपिबत् | अपिबताम् | अपिबन् |
| मध्यमपुरुषः | अपिबः | अपिबतम् | अपिबत |
| उत्तमपुरुषः | अपिबम् | अपिबाव | अपिबाम |

#### वस् – to live

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवसत् | अवसताम् | अवसन् |
| मध्यमपुरुषः | अवसः | अवसतम् | अवसत |
| उत्तमपुरुषः | अवसम् | अवसाव | अवसाम |



unit 12.indd 76 22-03-2019 15:09:09

# संस्कृतरञ्जनी - Class VII
# List of Authors and Reviewers


### Chair Person

**Dr. R. Thiagarajan,** M.A, Ph.D.,
Former Prof. of P.G & Research,
Department of Sanskrit,
Presidency College, Chennai.

### Reviewer

**Dr. V. Mohan,** M.A, Ph.D.,
Asst. Director,
CPR Institute of Indological Research Centre,
Alwarpet, Chennai.

### Authors

**S. Muthukumaraswamy,** Siromani, M.A., M.Phil., B.Ed.
Sanskrit Pandit, Sri Ahobila Math OHSS,
Chennai.

**V. Sriram,** Siromani, M.A., M.Phil., B.Ed.,
Sanskrit Pandit, Sri Ahobila Math OHSS,
Chennai.

### Text Book Writing

**Indological Research Institute**,
CPR Foundation,
Alwarpet, Chennai.

### Co-ordinator

**K.Chandrasekaran**
Lecturer,
DIET, Chennai.

## Art and Design Team

Layout
**Thy designer**

Cover Design
**Kathir Arumugam**

In-House
**Manohar Rathakrishnan**
**Jerald Wilson**

Co-ordination
**Ramesh Munisamy**

Typist
**Shanthi**



This book has been printed on 80 G.S.M.
Elegant Maplitho paper.

Printed by offset at:

NOTES



Authors List.indd 78 22-03-2019 15:11:37